9222
81 60

॥ श्रीः ॥

(व्याकरण)

पूर्वपक्षावली ।

चामराजेंद्र संस्कृत...
CHAMARAJENDRA SANSKRIT...
BANGALORE

PUBLISHED BY H. D. GUPTA & SONS. PROPRIETORS,
THE CHOWKHAMBA SANSKRIT BOOK DEPOT.

BENARES CITY.

Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press.

BENARES.

19[illegible]1

Sri Gargeshwari Digital Foundation

SRI CHAMARAJENDRA SANSKRIT COLLEGE LIBRARY

BANGALORE

Accn. No. 1218

1. The maximum time allowed for retention of a book shall be one fortnight. It may be borrowed again if not required by others.

2. No reference books shall be lent out.

3. No borrower shall have more than two volumes out of the Library at one time.

4. Borrowers must not pass books from one to another but must return them to the Librarian.

5. Library books must not be used as class-books.

6. Any one who defaces by writing or otherwise damages any book shall pay the full cost of the book or of the entire works, if it consists of more than one volume.

7. The borrower shall be responsible for the value of the books lent out to him if they are lost, damaged or otherwise cannot be returned to the Library when they are due or recalled.

8. The presence of the voucher with the Librarian shall be considered sufficient proof of the non-return of books.

Class and No. H ~~60~~ 81

1615-36 The Bangalore Press

SGDF
Sri Gargeshwari Digital Foundation

H 81
1218

पूर्वपक्षावलम्बा

सूचीपत्रम् ।

धातोस्तन्निमित्तस्यैव १
ओतः श्यनि १
आदे च उपदेशेऽशिति १
वाहऊठ् २
विभक्तिश्च ३
नविभक्तौतुस्माः ३
अष्टन आविभक्तौ ३
सुपिच ३
सुपो धातुप्रातिपदिकयोः ३
अनुदात्तौसुप्पितौ ३
कुर्दादिवदुपधायांच ४
विड्वनोरनुनासिकःस्यात् ४
उपधायाश्च ४
षात् पदान्तात् ४
कृत्यचः ४
भावकर्मणोः ४
रषाभ्यांणोनः समानपदे ४
ददातिदधात्योर्विभाषा ४
श्लौ ४
आर्धधातुकस्वेड्वलादेः ५
ऋतइद्धातोः ६
स्यसिच् सीयुट् तासिषु ६
व्यपदेशिव द्भावोऽप्राति-
पदिकेन ६
पूर्वादिनिः ६
सपूर्वाच ६
इष्टादिभिश्च ६
नान्ता दसंख्यादेः ६
स्त्रीप्रत्यये चानुपसर्जनेन ६
उपमानाच्च ७
अणिञोरनार्षयोः ७
यङ श्चाप् ७
त्यङः संप्रसारणं ७
पुत्रपत्योस्तत्पुरुषे ७
स्तोश्चुनाश्चुः ७
वावसाने ८
जक्षित्यादषः षट् ८
प्राचां ष्फ स्तद्धितः ८
क्रोड्यादिभ्यश्च ८
भस्याटेः ९

E 9212
SGDF
Sri Gargeshwari Digital Foundation

लोहितादिकतन्तेभ्यः	८
घेर्ङिति	१०
आण्नद्याः	१०
अनेकाल् शित् सर्वस्य	१०
ङिच्च	११
स्थानिवदादेशोऽनल्विधौ	११
इको गुणवृद्धी	१२
थलि च सेटि	१२
न शसददवादिगुणानाम्	१२
ऋच्छत्यॄदिताम्	१२
हलन्ताच्च	१३
सनिसदिदृशोर्झल्यमकिति	१३
न लोपः प्रातिपदिकान्तस्य	१३
मादुपधायाश्च	१३
तस्माच्छसोनः पुंसि	१३
औम् शसोः	१३
जश्शसोः	१३
हल्ङ्याभ्योदीर्घात्सुति स्यपृक्तं हल्	१४
संयोगान्तस्यलोपः	१४
ङसिङसोश्च	१५
समः सुटि	१५
सार्वधातुकार्द्धधातुकयोः	१६
वृद्धिरेचि	१८
लोपः शाकल्यस्य	२०
मोऽनुस्वारः	२१
नोपधायाः	२२
धातोः	२४
अदर्शनं लोपः	२४
अदस औत्सुलोपश्च	२५
यासुट् परस्मैपदेषूदात्तो-ङिच्च	७२
अल्लोपो न	२८
शर्परेविसर्जनीयः	२९
डावुभाभ्यामन्यतरस्याम्	३०
ङमोह्रस्वादचि ङमुण्नित्यम्	३४
अभिनिविशश्च	३५
आमिसर्वनाम्नः सुट्	३६
भवतेरः	३७
डगिचपदे	३९
अतोऽम्	३९
झलोझलि	३९
अमोमश्	४०
आदेः परस्य	४०

इति पूर्वपक्षावलि सूचिपत्रम्

SGDF
Sri Gangeshwari Digital Foundation

H 62
CHAMARAJENDRA SANSKRIT ...
चामराजेंद्र संस्कृत ...
1374
34
BANGALORE

श्रीगणेशाय नमः।

अथ पूर्वपक्षात्वलि प्रारम्भः ॥

यत्तु धातोस्तान्निमित्तस्यैवेति सूत्रे यादौ प्रत्यये परे धातोरेचश्चेद्वान्तादेशस्तर्हि तन्निमितस्यैवेति सूत्रार्थः। नियमार्थमिदं सूत्रं। लव्यादौ वान्तो यि प्रत्यये इत्यनेनैव सिद्धत्वादिति। एवकारग्रहणं विपरीतनियमबाधनार्थम्। अन्यथा यादौ प्रत्यये एचश्चेद्वान्तादेशस्तर्हि धातोरेवेति नियमस्स्यात् तथा सति बाभ्रव्यमित्यादौ वान्तादेशो न स्यात् अत्र मधुबभ्रोर्ब्राह्मणकौशिकयोरित्यनेन यञ्प्रत्ययः। अत्रोच्यते इदं सूत्रं यादिप्रत्ययनिमितकस्यैवैचो वान्तादेशप्रवृत्त्यर्थमिति फलितम्। तेनओयते औयतइत्यादौ न वान्तादेशः आङ्पूर्व्वाद्वेञः कर्म्मणि लटि यकि च वचिस्वपियजादीनामिति संप्रसारणे पूर्वरूपे ओयते इति रूपं तस्यैव धातोः कर्म्मणि लङि औयतइति रूपम् किं धातोस्तन्निमितस्यैवेति सूत्रेणेति अत्र हि वान्तादेशनिवृत्त्यर्थं न यकीत्येवसूत्रमस्तु यकि परे एव वान्तादेशो नेत्यर्थात्सिद्धम् ओयते औयतइति तु कुबुद्धिकल्पनम्। न च गोशब्दादाचार क्विपि गोषु साधुः यति गोयमित्यत्रापि वान्तादेशप्रसङ्गः यक्परत्वाभावेन न यकीति निषेधाप्रत्तेः। सूत्रमते तु न भवति यादिप्रत्ययनिमित्तकत्वाभावादितिबाच्यम् नैव संध्यक्षरमन्त्यमस्तीति इकोगुणवृद्धीति वदत्रजेति सूत्रस्थभाष्यप्रामाण्यात् "ओतः श्यनि" "आदेचउपदेशेऽशिती"ति सूत्रभाष्यप्रमाण्यात् एजन्ते-

SGDF
Sri Gargeshwari Digital Foundation

भ्य आचारक्विपो ऽनभिधानमेव एवञ्च गोयमित्यस्यासाधुत्वमेव अथापि भूधातोरन्येभ्यो ऽपि दृश्यते इति विचि कीलालप आगतमिति भाष्यप्रामाण्येन लोके ऽपि क्व चिद्विचो लाभेन भूधातोर्विचि तन्निमित्ते गुणे कृते भो इति रूपं तस्मात्साध्वर्थे तत्र साधुरिति यति भोयमिति भविष्यति तन्न स्यादिति यथा कथञ्चित् अन्यत्समाधानं जनानवतीति जनौः तस्मात्साध्वर्थे यति जनौयमिदम् दुरुद्धरदूषणं बोध्यमिति अतो ऽन्यत्समाधाने विभावयन्तु सुधिय इत्याहुः । अत्रोच्यते यिप्रत्यय इतिशब्दाध्याहारे निमित्तत्वं सप्तम्यर्थस्तद्योतकन्तु तन्निमित्तस्यैवेति नापूर्व्वं बालबोधनार्थं ततश्च यादिप्रत्ययनिमित्तकस्य धातोरेचो वान्तादेशविधानादिष्टं सिध्यति सप्तम्यर्थस्यनिमित्तत्वार्थाभावे ओयते औयतइति प्रत्युदाहरणम् । किञ्च वान्तो यि प्रत्ययस्ये तु गोपयसोर्यत् इति तद्धिते तु सुबन्तात्प्रातिपदिकाद्वा तद्धितविधानसिद्धौ व्यादौ नामविषयत्वमेव वान्तो यि प्रत्ययस्य भाष्याल्लभ्यते न तु धातुविषयत्वं ततश्च धातोरित्यारब्धमृषिणा एवञ्च किं न यकीत्यादिनिषेधादिति गोयं भोयमित्यादीनामनभिधानादसाधुत्ववर्णनं शङ्कनीयमत्रमशुद्धमेवेति भाष्यविज्ञाः पण्डिताः वदन्ति ॥ यत्तु असिद्धं बहिरङ्गमन्तरङ्गे अस्याश्च "वाहऊठ् इति सूत्रस्थोठ्ग्रहणं ज्ञापकम् । अन्यथा वसोः संप्रसारणमिति सूत्रात्संप्रसारणपदानुवृत्त्या वाहेत्यत्र वस्य संप्रसारणे पूर्व्वं रूपे तन्निमित्तके लघूपधगुणे कृते वृद्धिरेचीति वृद्धौ सिद्धं विश्वौहः विश्वौहेत्यादीति शेखरग्रन्थसिद्धान्तः । अत्रापूर्व्वाशङ्का केन चिदुद्भाव्यते ऊठो ऽकरणे यद्यपि न रूपासिद्धिर्दोषः तथापि स्वरासिद्धिर्दोषः स्यादेव प्रौहः प्रौढेत्यादौ ऊठिदंपदाद्यप्पुमरैः द्युभ्यः ऊठादिभ्यः

SGDF
Sri Gargeshwari Digital Foundation

परा या ऽसर्वनामस्थानविभक्तिः सा उदात्ता स्यादिति तस्यार्थः। एवञ्च ऊठो ऽकरणे कथं तन्निमित्तको विभक्त्युदात्तः ऊठः स्थाने संप्रसारणपदकरणे तु यूनः यूना इत्यादावतिव्याप्तिः तस्मादयुक्तो भाष्यादिग्रन्थः। अत्रोच्यते ऊठिदंपदादिति सूत्रे वविदंपदादित्यस्तु उश्च उश्च अनयोः समाहारः उ च वाश्च वौ लोपो व्योरिति वलोपः अवादेशः वविदं पदादिति तथा च व्यञ्जनमात्रस्य स्थाने यो दीर्घ ऊकारः वाइत्यस्य स्थाने यो ह्रस्वउकारः ततः परा या ऽसर्व्वनामस्थानविभक्तिः सा उदात्ता स्यात् आद्योदाहरणन्तु जूरः जूरा ज्वरेत्यूद् द्वितीयस्योदाहरणन्तु विश्वौहः विश्वौहेति यथा कथञ्चित्। केचित्तु ऊङ्ग्रहणं परिभाषाज्ञापकमित्रस्य दीर्घोच्चारणं ज्ञापकमित्यर्थः। संप्रसारणमूठि कृते ण्विनिमित्तके गुणे कृते वृद्धिरेचीति वृद्धौ सिद्धं विश्वौहः इत्यादि ऊठिदंपदादित्यत्र उविदंपदादितिन्यासेन जूरः जूरा विश्वौहः विश्वौहेत्यत्र च स्वरसिद्धिरिति समाधानं कुर्वन्ति॥ विभक्तिश्च सुप्तिङौ विभक्तिसंज्ञौ स्तः संज्ञाप्रदेशा न विभक्तौतुस्मा इत्यादयः अत्रोच्यते विभक्तिश्चेतिसूत्रं मास्तु न विभक्ताविल्यत्र सुप्तिङावेवास्तु अष्टन आविभक्ताइत्यादिविभाक्तिपदघटितसूत्रे सुब्ग्रहणमेवास्तु त्यदादीनामं इत्यत्र सुपीत्यनुवृत्त्येव सिद्धेः। न च त्यदादीनाम इत्यत्र सुप्ग्रहणे यत्र तत्रे त्यादौ प्राग्दिशीये अत्वानापत्तिरिति वाच्यम्। तेनापि सुप्सञ्ज्ञाया एव विधानात् न च सुप्संज्ञायाम् एतर्हि तत्रेत्यादौ सुपि चेति दीर्घापत्तिरितिवाच्यम्। सुपि चेत्यत्र यभीति न्यासेन निर्वाहात् भादौ यादौ सुपीति तदर्थात् न च यत्र तत्रेत्यादौ सुपो धात्विति त्रादेर्लुगापत्तिः इदानीं तदानीमित्यादौ अनुदात्तौ सुप्पिताविति अनुदात्तता च स्यादिति

SGDF

वाच्यम् । तत्र तसिलादीनां विधानसामर्थ्येन लुगनापत्तेः त्र-
लादिलित्करणेन प्राग्देशीये अनुदात्तौ सुप्पितावित्यस्याप्रवृत्ति-
रिति विभावयन्तु समाधानं शाब्दिकाः । घुणघूर्णभ्रमणे दीर्घो-
च्चारणं प्रक्रियालाघवाय अन्यथा कुर्दादिवदुपधायां चेत्यनेनैव
दीर्घसिद्धेः इति शेखरग्रन्थः अत्र केचिच्छङ्कते ऽयुक्तो ऽयं शेख-
रग्रन्थः दीर्घोच्चारणं न केवलं प्रक्रियालाघवार्थमेव यत्रोपधायां
चेत्यस्याप्राप्तिस्तत्र दीर्घोच्चारणस्य सार्थक्यात् घूर्णधातोर्वनि-
पि विड्वनोरनुनासिकः स्यात् अनेन णकारस्यात्वे हल्पर-
रेफपरत्वाभावेन उपधायाश्चेत्यस्याप्रवृत्त्या घूरावा ब्राह्मणी-
त्यत्र दीर्घोच्चारणस्य साफल्यादितिदूषणाऽभासः वस्तुतस्तु
अन्तरङ्गत्वादात्वात्प्रागेव दीर्घे न काप्यनुपपत्तिरित्याहुस्तन्न घू-
रावा ब्राह्मणीत्यस्यानभिधानमेवेति नागेशाऽभिप्रायः अन्वा-
ख्यानप्रक्रियालाघवे सति कथमेव घूर्णपाठ नापि हानिः नात्र
छिद्रान्वेषणे प्रवेशः इत्यवेहि ॥ षात्पदान्तात् षकारात्परस्य
नस्य णत्वन्न स्यादिति सूत्रार्थः । निष्पानं सर्पिष्पानमित्याद्युदा-
हरणं कृत्यचइति भावकर्मणोरिति च प्राप्तं णत्वं प्रतिषिध्यते
अत्र सूत्रे पदात्किम् पुष्णातीति प्रत्युदाहरणम् । अत्र रषाभ्या-
मितिणत्वस्य प्रतिषेधः स्यादिति मनोरमाग्रन्थः अत्रेयमाशङ्का
पुष्णातीत्यत्र णत्वप्रतिषेधे ऽपि ष्टुत्वेन रूपासिद्धेरिति व्यर्थमेव
पदान्तग्रहणमिति । तत्रोच्यते रषाभ्यामिति सूत्रे भाष्ये उक्तम्
षग्रहणमुत्तरार्थम् षात्परस्य नस्य ष्टुत्वेन निर्वाहात् एवञ्च षा-
त्पदान्तादित्यनेनापि ष्टुत्वस्यैव निषेधः एवञ्च पादान्तग्रहणा-
भावे पुष्णातीत्यत्र ष्टुत्वनिषेधे रूपासिद्धिः स्पष्टैवेति समाधा-
नम् ददातिदधात्योर्विभाषा आभ्यां शः स्यात् ददः दधः दा-
धाभ्यां शपि जुहोत्यादित्वाच्छपः श्लौ द्वित्वे आतोलोपे सिद्धम्

SGDF
Sri Gargeshwari Digital Foundation

ददः दधः पक्षे आदन्तलक्षणे युकि दायः धाय इति अत्रेयमा-
शङ्का मास्त्विदं सूत्रं दददाने दधधारणे इमौ धातू आभ्यां पचा-
दित्वादचि ददः दधः आदन्ताभ्यां दाधाभ्यां णे युकि दायः
धाय इति अत्रोच्यते अचिकृतेन दद इति अददः अत्र नञ्त-
त्पुरुषे तुल्यार्थे तृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्या इत्यने-
नाव्ययपूर्वं पदप्रकृतिस्वर इष्यते तं बाधित्वा अच्कावशक्तौ अ-
जन्तं कान्तम् अन्तोदात्तं स्यात् अशक्तौ इति अन्तोदात्तत्वं स्या-
दिति सूत्रतत्त्वम् । चितःसप्रकृतेर्बह्वकच्कार्यार्थं चितः स्थाने चि-
त्प्रकृतेरन्त उदात्तो भवतीति तदर्थः न तु प्रत्ययमात्रस्यान्तः
उदात्त इति अत्र अकचश्चित्वं ज्ञापकम् अन्यथा अकच एवान्तो-
दात्त्वे प्रत्ययस्वरेणैवोदात्तत्वे सिद्धे तद्व्यर्थं सदत्र ज्ञापकमित्य-
त्र शेखरग्रन्थः तास्यानुदात्तेङ्दिुपदेशाल्लसार्व्व धातुकमनुदात्तम-
ह्विङोः अस्मात्परं लसार्वधातुकमनुदात्तं स्यादिति तदर्थः न्हुङ्-
अधीङ्वर्ज्जयित्वा अत्र च शेखरग्रन्थ रुणद्धीत्यत्र श्नमो मित्वेन
परश्चेत्यस्य बाधे तत्सन्नियोगशिष्टप्रत्ययाद्युदात्तस्याप्राप्तौ तन्म-
ध्यपतितन्यायेन विशिष्टस्य धातुत्वात् धातुस्वरेणान्तोदात्तत्वमि-
त्युक्तम् । अयं ग्रन्थः परस्परविरुद्धः यथा ऽत्र मित्वेन परश्चेत्य-
स्य बाधे तत्सन्नियोगशिष्टप्रत्ययाद्युदात्तस्यापि बाधः एवमकजपि
प्राक् टेर्ग्रहणेन परश्चेत्यस्य बाधकः तत्सन्नियोगशिष्टप्रत्ययाद्युदा-
त्तस्याप्राप्तावित्यस्य ज्ञापकतावर्णनयुक्तमिति विरोधः । अत्र
नवीनैरित्थं परिह्रियते उभशब्दस्य सर्वादौ पाठो व्यर्थ इति प्र-
घट्टके भाष्यग्रन्थे ऽथेदानीं काकचोः स्वरे विशेषो नास्तीति अ-
स्मादेव भाष्यादकचि सन्नियोगशिष्टन्यायस्यानाश्रयणम् श्न-
स्याप्यनाश्रयणे प्रमाणाभावः अन्यदपि विभावयन्तु सुधियः ॥
आर्द्धधातुकस्येड्वलादेः अत्रार्द्धधातुग्रहणं किम् जुगुप्सते अत्रा-

SGDF
Sri Durgasaptati Digital Foundation

पि इट् स्यादिति शेखरग्रन्थः अत्र सूत्रे भाष्ये ऋत इद्धातोरित्यतो धातोरित्यनुवर्त्त्य धातोर्विहितस्य धातुपदमुच्चार्य विहितस्य वलादेरित्यर्थः तेन जुगुप्सते इत्यत्र नेडित्यार्द्ध धातुकग्रहणं प्रत्याख्यातं । सार्व्वधातुकस्यचनेट् रुदादिभ्यःसार्व्वधातुके इति नियमात् तस्य सिद्धः स्यसिचूसीयुट्तासिष्वितिसूत्रे च प्रकृतेऽपीडागमः प्राप्नोतीत्याशङ्क्य आर्द्धधातुकस्येडित्यतो आर्द्धधातुकग्रहणमनुवर्त्त्य योगविभागमाश्रित्य यावानिट् स सर्वो ऽपि आर्द्धधातुकस्यैवेति नियमात् प्रकृतेरनिडित्युक्तम् अयं भाष्यग्रन्थः पूर्वापरविरुद्धः शेखरग्रन्थो ऽपि भाष्यविरुद्धः । अत्रेत्थं विरोधोद्धारं केचित् कुर्व्वन्ति विधिसूत्रे प्रयोजनं नास्तीति प्रत्याख्यानार्थः योगविभागाय एतत्प्रयोजनमित्यर्थः । जुगुप्सते इतिशेखरग्रन्थस्तु धातुग्रहणमननुवृत्त्योक्तम् ॥ व्यपदेशिवद्भावो ऽप्रातिपदिकेन अत्र च ज्ञापकम् पूर्वादिनिः सपूर्वाच्चेति सूत्रद्वयकरणम् अन्यथा पूर्वादिनिसपूर्वादित्येकयोगेन निर्वाहात् न च इष्टादिभ्यश्चे त्यनुवृत्त्यर्थं सपूर्वादिनिरितिपृथग्योगस्तत्रावश्यकस्तेनानिष्टीति सिद्धमिति वाच्यम् । अनिष्टीत्यस्यानिष्टत्वात् इष्टत्वे एकयोगकरणे ऽप्येकदेशानुवृत्तौ बाधकाभावात् एवञ्च परिभाषाज्ञापकम् । इयं च धर्म्मिग्राहकमानात् प्रत्ययविधिविषयैव अत एव नान्तादसंख्यादेर्मडिति चरितार्थम् अत एवेत्यस्य प्रत्ययविधिरेवेत्यर्थः अतएवेत्यस्य परिभाषास्वीकारात् एवेत्यर्थः अग्रे नान्तादसंख्यादेरित्यचारितार्थ्यमित्यस्याप्रत्ययविधित्वेन तत्र संख्यादित्वाविरोधात् । (एवं त्रिपादीस्थाशास्त्रसिद्धये अत्रापि त्रिपादीकर्तृकसत्ताभावज्ञानं प्रतिबन्धकम् एवञ्च पूर्वशास्त्रं प्रति त्रिपादीस्थमसिद्धमित्यनुपपन्नमेव स्यादत अनाहार्येत्युक्तम् १ "स्त्रीप्रत्यये चानुपसर्ज्जने न" अनुपसर्ज्जने स्त्रीप्रत्यये

SGDF
Sri Gargeshwari Digital Foundation

तदादिनियमो न उपसर्ज्जने तु तदादिनियमो भवत्येव तदादिनियमो नेत्यस्य प्रत्ययग्रहणपरिभाषोपस्थितिर्नेत्यर्थः अस्या उदाहरणम् परमकारीषगन्धीपुत्र इति करीषस्येव गन्धो ऽस्य करीषगन्धिः उपमानाच्चेति गन्धस्य इकारादेशः करीषगन्धेरपत्त्यं स्त्री इत्यर्थे तस्यापत्त्यमित्यणि अणिञोरनार्षयोरिति अणः ष्यङादेशे वृद्धौ यङश्चाविति चापि कारीषगन्ध्या परमा चासौ कारीषगन्ध्या चेति परमकारीषगन्ध्या तस्याः पुत्रः इति षष्ठीतत्पुरुषः अत्र ष्यङः संप्रसारणं पुत्रपत्त्योस्तत्पुरुषे इति संप्रसारणे पूवरूपे संप्रसारणस्येति दीर्घः अत्र ष्यङन्तं यत्पूर्वपदं तस्य संप्रसारणमित्यर्थः प्रत्ययग्रहणपरिभाषाऽनुपस्थित्या परमकारीषगन्ध्या इति विशिष्टस्य ष्यङन्तत्वेन संप्रसारणं सिध्यति अतिकारीषगन्ध्या पुत्र इत्युपसर्ज्जने प्रत्ययग्रहणपरिभाषोपस्थित्या कारीषगन्ध्येत्यस्यैव ष्यङन्तत्वेन तस्य पूर्व पदत्वाभावात् न संप्रसारणमित्यर्थः । अत्रोच्यते अतिकारीषगन्ध्यापुत्र इत्यत्र संप्रसारणाभावार्थं स्त्रीप्रत्यये इत्यादिपरिभाषास्वीकर्त्तव्या इतिस्थितं तदर्थं नारम्भणीया ष्यङःसंप्रसारणमितिसूत्रे अनुपसर्ज्जनस्येत्येव वक्तव्यम् अनुपसर्ज्जनस्य ष्यङन्तस्य संप्रसारणं भवतीत्यर्थेन अतिकारीषगन्ध्यापुत्र इत्युपसर्जने संप्रसारणाभावः सिद्ध एवेति परिभाषा न कर्त्तव्या अत्रेत्थं नवीनः समादधति परिभाषाया असत्त्वे परमा कारीषगन्ध्या यस्य स परमकारीषगन्ध्यः विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपो द्रष्टव्य इत्यनेन परमशब्दस्य लोपे पुनः कारीषगन्ध्यस्य पुत्रः इति विग्रहे तत्पुरुषसमासे कारीषगन्धीपुत्र इति सम्प्रसारणमिष्यते सूत्रे अनुपसर्जनस्येति प्रतिषेधेन ष्यङन्तस्य इहोपसर्ज्जनत्वेन न स्यादितिवाच्यम् ॥ स्तोश्चुनेति सूत्रे योगः संयोगपरः स्यात् समासे

SGDF
Sri Gargeshwari Digital Foundation

उदाहरणम् ज्योतिष्टोमः आयुष्टोमः अत्र मूलग्रन्थे समासे इत्यस्य प्रत्युदाहरणम् । ज्योतिषो नाम ज्योतिःशब्दात्परो यत्र स्तोमशब्दो व्यपेक्षायां यत्र षत्वं स्यादित्यर्थः तिष्ठतु ज्योतिः स्तोमो ऽस्ति ब्राह्मणानां इत्यादाविति मूलाशयः ॥ रामादिति अत्र जश्त्वं वावसाने इति मूलग्रन्थः । तस्य मनोरमादि ग्रन्थे इत्थं व्याख्यानं पूर्वं जश्त्वं पश्चाद्वावसाने इति शब्देन्दुशेखरग्रन्थे तु जश्त्वं बाधित्वा वावसाने इत्युक्तम् बाधकत्वं त्वपवादकत्वेन तच्च जश्त्वाप्राप्तियोगे चर्त्वस्याचरितार्थत्वरूपम् इदं चासङ्गतम्। रत्नमुट्रत्नमुडिदिरूपद्वयस्यासिद्धिप्रसङ्गात् रत्नमुडित्यत्र जश्त्वं बाधित्वा षस्य एव चर्त्वे तदभावे जश्त्वं तथाच रत्नमुष् रत्नमुट् इति स्यात् । अत्र केचित्समाधानं वदन्ति जक्षित्यादयः षट् इति निर्देशेन षस्य चर्त्वेन टकार एव न षकारः जश्त्वबाधकत्त्वं चर्त्वस्येति ग्रन्थस्य पूर्वापरविरोधः । उपानदित्यत्र शेखरे उक्तं धत्त्वदत्त्वचर्त्वानीति तदसङ्गतं स्यात्, किञ्च चतुर्णामित्यत्र णत्वं द्वित्वमिति प्रतीकमुपादाय ननु द्वित्त्वं णत्वमित्येव युक्तं तत्र पूर्वत्रासिद्धीयमद्वित्वे इति वचनात् इदञ्च वर्णद्वित्वे ऽपि प्रवर्तते वाक्वाग् इति भाष्योदाहरणात् द्वित्वदृष्ट्या चर्त्वस्यासिद्धत्वात् प्राक् एकस्यैव द्वित्वे अन्यस्य चर्त्वे पूर्वगश्रवणापत्तिरित्युक्तम्। अस्मादप्यायाति पूर्वं जश्त्वं पश्चाच्चर्त्वमिति विभावयन्तु सुधियः ॥ प्राचां ष्फ तद्धितः यञन्तात् ष्फः स्यात्स च तद्धितः अत्र सूत्रे तद्धितग्रहणं प्रातिपदिकार्थं तत्फलन्तु ङीष्सिद्धिः तत्रापि प्रातिपदिकाधिकारात् तत्तु षित्त्वसामर्थ्येन साधितं यस्येति लोपार्थमपि तद्धितसंज्ञानापेक्षिता गार्ग्यायणीत्यत्र सवर्णदीर्घेणापि रूपसिद्धेः पुनस्तद्धितग्रहणं ज्ञापयति । क्व चिदन्यतो ऽपि ष्फो भवति । तेन आसुरेरुपसंख्या-

SGDF
Sri Gargeshwari Digital Foundation

नमिति सिद्धम् । न ह्यत्र तद्धितग्रहणमन्तरा इकारनिवृत्तिरूपं फलम् इति मनोरमादिग्रन्थे प्रयोजनमुक्तम् । तत्सर्वं यथाश्रुतन्यासे । वस्तुतस्तु प्राचां ष्फडित्येव सूत्रमस्तु तत्र षित्वात् ङीष्सिद्धिः डित्वं तु क चिदन्यतो ऽपि ज्ञापयति तेन आसुरेति सिद्धम् । न च प्रातिपदिकसंज्ञार्थं तद्धितग्रहणमावश्यकमिति वाच्यम् । पित्वसामर्थ्यादप्रातिपदिकत्वे ऽपि ङीष् भवतीति ज्ञापनात् । न च गौकक्ष्यायणीति रूपासिद्धिः गोकक्षशब्दो गर्गादिः तेन यञ् तदन्तात् क्रोड्यादिभ्येश्चति ष्यङ् ततः यङश्चाविति चाप् गौकक्ष्या ततः ष्फप्रत्यये विवक्षिते भस्याढे इति पुंवद्भावः तेन ष्यङ्चापोर्निवृत्तिः फस्यायनादेशः षित्वात् ङीष् गौकक्ष्यायणीतिरूपं सिद्धम् । एतच्च ताद्धिते ग्रहणे सत्येव सङ्गच्छते अन्यथा पुंवद्भावाप्रवृत्तौ यङन्तत्वाभावेन ष्फो न स्यात् इति के चित्समाधानमूचुः तन्न । भाष्ये गौकक्ष्याशब्दस्य क्रोड्यादिषु पाठः प्रत्याख्यातः गौकक्ष्याइति रूपासिद्धिस्तु यङश्चाबित्यस्याप्रवृत्तावपि षाद्यञश्चाप् वाच्य इति वार्त्तिकेन चाप् तेन गौकक्ष्यायणीति । न च ष्फप्रत्ययस्य बाधादिति रूपासिद्धिः वाच्यम् । प्राचां ष्फेति सूत्रे सर्वत्र लोहितादिकतन्तेभ्य इति सूत्रात् सर्वत्र ग्रहणमनुवर्त्तते तच्च क चिद्बाधकविषये ऽपि प्रवृत्त्यर्थम् गौकक्ष्याइति प्राचां मते । एवञ्च गोकक्ष्याया प्रतिषेधो वक्तव्यः इति सम्प्रसारणनिषेधवार्तिकमपि नारम्भणीयमित्यपरमपि लाघवम् । अत्र समाधानं विभावयन्तु सुधियः ॥ नञ्स्नञीकक्ख्युन् अत्र तरुणतलुनयोः प्रथमवयोवाचकता भावात् वयसि प्रथमे इत्यस्याप्राप्ते वार्तिके तयोरुपादान, न च वयस्यचरमइति वार्तिकेन ङीप्सिद्धेः पुनस्तयोर्ग्रहणं व्यर्थमिति वाच्यम् । तरुणतलुनयोर्गौरादिगणे पाठेन तत्सामर्थ्यात् ङीषो ङीपो

SGDF
Sri Gargeshwari Digital Foundation

बाधो माभूदिति वार्तिके तयोरुपादानात् ङीपूङीषोस्तु स्वरे भेद इति मनोरमाशेखरादावुक्तम् तत्र मास्तु तरुणतलुनयोर्ग्रहणम् वार्तिके गौरादिपाठो ऽपि मास्तु बह्वादौ तरुणतलुनयोः पाठः कार्यः तेन बाह्वादिभ्यश्चेति ङीष् तदभावे ऽपि वयस्यचरमइतिङीप् एवञ्च सकलेष्टसिद्धिः। अत्र समाधानं विभावयन्तु सुधियः । घेर्ङिति अत्र घेर्ङि इत्येव सूत्रमस्तु सुपि चेत्यतः सुपीत्यनुवर्तते तच्च विशेष्यं ङीति विशेषणम् एवञ्च यस्मिन् विधिस्तदादावल्ग्रहणपरिभाषोपतिष्ठते तथा च ङादौ सुपि गुणो भवतीत्यर्थः। न च प्रवाहवेत्यादौ प्रवाहुशब्दात् तृतीयैकवचनं तत्स्थाने आङ्याजयाराणामुपसंख्यानमिति वार्तिकेन आङादेशः चत्र ङादित्वाभावात् गुणो न स्यादिति वाच्यम् । ङादेशेनैव तत्सिद्धेः न च मत्यामित्यादौ ङेरामि कृते आण्नद्या इत्याट् न स्यात् अत्राटः प्रयोजनन्तु नुड्बाधनरूपं स्थानिवद्भावस्तु न विशेषणेनाल्लाश्रयणे ऽनल्विधाविति निषेधादिति वाच्यम् । ङेरामित्यत्र ङेर्ङाम् नद्याम्नीभ्य इत्येव सूत्रमस्तु ङेर्ङामादेशेन सकलेष्टसिद्धिः अत्र समाधानं मृग्यमिति तन्न । ह्रस्वात्तादौ तद्धितइत्यत्र ह्रस्वात्ति इति वक्तव्ये आदिग्रहणं व्यर्थीभूय ज्ञापयति यस्मिन् विधिरित्यस्या अनित्यत्वं तथा च ङान्ते सुपीत्यर्थापत्तौ उदाहरणस्यैवोच्छेदापत्तिरिति समाधानसत्वात् । ननु ङेर्ङामि कृते इत्संज्ञापि प्राप्ता आडागमो ऽपि प्राप्तः तत्र वार्णादाङ्गं बलीय इति इत्संज्ञां बाधित्वाट् स्यात् ततश्च प्रत्ययादित्वाभावात् ङकारलोपो न स्यात् अत एवान्तरङ्गत्वेनापि पूर्वं ङलोपो न वार्णपरिभाषा असिद्धपरिभाषाबाधिकेति सिद्धान्तात् नित्यत्वाच्च पूर्वमाडागम इति केचित्समाधानं कुर्वन्ति १७ अनेकाल् शित्सर्वस्यः अत्र सूत्रे शेखरकृतोक्तम् नानेकाल् इति न

SGDF
Sri Gargeshwari Digital Foundation

सूत्रितम् । तथा सति अनन्तरस्येतिन्यायेनेदमादेः परस्यैव बाधकं स्यान्न तु ङिच्चेत्यस्येति इदं विरुद्धं तथा सति ङिच्चेति व्यर्थं ङिद्यो ऽनेकाल्स अलो ऽन्त्यस्य भविष्यत्येवेति तदर्थं सदनन्तरस्येति न्यायो ऽत्र न प्रवर्ततइति ज्ञापयिष्यति । अत्र समाधान विभावयन्तु सुधियः १८ ॥ अदर्शनं लोपः अत्र सूत्रे शेखरे उक्तम् प्रसक्तपदाभावे ग्रामे तिष्ठतीत्यत्र ल्यब्लोपे पञ्चमी तु न भवति ल्यबन्तार्थनिरूपिताधिकरणत्वं ग्रामस्य नास्तीति न दोषः पश्चादुक्तं त्रपु इत्यत्र तुगापत्तिरस्ति चात्र क्विपो ऽदर्शनम् । एवं च प्रत्ययलोपे प्रत्ययलक्षणं भवतीति तुक्प्राप्नोति अयं ग्रन्थः स्थानिवदादेशो ऽनल्विधाविति सूत्रस्थभाष्यविरुद्धः तत्र भाष्ये उक्तं बुद्धेरेव स्थान्यादेशभाव इति । अन्यथा शब्दानित्यत्वप्रसङ्गात् । पुनश्च शङ्कितम् । सति कर्मणि इत्यणः बुद्धिप्रसक्तौ कबुद्धिः क्रियेत केन चित्कार्यं प्राप्नोति किं कारणम् स्थानिवत्त्वात् समाहितं च षष्ठीनिर्दिष्टस्यादेशः स्थानिवद्भवतीति न स्थानिवद्भावः एवं प्रकृते षष्ठीनिर्दिष्टत्वाभावात्स्थानिवत्त्वाप्राप्तिः प्रत्ययलोपे प्रत्ययलक्षणामिति तु नियमार्थम् । तेन तद्विषये सर्वत्र स्थानिवत्त्वेन निर्वाहः एवं च त्रपु इत्यत्र तुकः प्राप्तिरेव नेति तद्विरोधः समाधानं तु षष्ठीनिर्दिष्टस्येति नानुवर्तते । अपवादे उत्सर्गकृतं तु न भवति यदयं शबपवादभूतान् कांश्चिच्छ्यन्नादीन् शितः करोति । अन्यथा स्थानिवत्त्वेन निर्वाहात् १९ द्वित्रिश्चतुरितिकृत्वो ऽर्थे यो विसर्ग इति नार्थः चतुःशब्दे ऽसम्भवात् किन्तु द्विरादीनामित्यत आह वर्त्तमानामेषामिति । इसुसोरितिसूत्ररीत्या सुच इति सूत्रयितुमुचितं सुजन्तस्य पदस्येत्यर्थादिति शेखरे उक्तम् । इदं चासङ्गतमिव भाति सुच इतिन्यासे चतुःकरोतीत्यत्र इदुदुपधस्येत्येतद् दृष्ट्या सुच

इत्यस्यासिद्धत्वात् । नित्यं षत्वापत्तेः सिद्धान्ते तु चतुर्ग्रहणसामर्थ्यान्न नित्यं षः समाधानं तु सुच इति न्यास इदुदुपधस्येत्यतः प्राक् पाठ्य इति न कश्चिद्दोषः २० इकोगुणवृद्धी । इग्ग्रहणमात्सन्ध्यक्षरव्यञ्जननिवृत्त्यर्थमिति । अत्र च कैयटग्रन्थः अकारस्य सत्यसति च गुणे कृते रूपे विशेषो नास्तीत्यकारग्रहणं वार्तिके न कृतमिति । अत्र केचिद्विशेषं दर्शयन्ति । अकारस्याकारे गुणे कृते पेचिथेत्यत्र न शसददवादिगुणानामिति निषेधादेत्वाभ्यासलोपौ न स्त इति विशेषो ऽस्त्येव । थलि च सेटीति सूत्रारम्भसामर्थ्यान्न निषेध इति चेन्न । एवं च पेचिथेत्यत्रेव ववरिथ ससरिथेत्यादावपि निषेधानापत्तिः न शसददेति सूत्रे गुणग्रहणस्य न वैयर्थ्यम् । पपरतुः पपरुरित्यादौ ऋच्छत्यृतामिति गुणे एत्वाभ्यासलोपनिवृत्त्या चारितार्थ्यात् अत्र केचिदित्थं समाधानं कुर्वन्ति । केवलं दीर्घस्थानेगुणग्रहणस्य लब्धावकाशत्वे गुणग्रहणमपहाय तत्स्थाने ऋग्रहणमेव कुर्यात् । सामान्यग्रहणं विजातीयस्थानिको विजातीयो गुणो गृह्यतइति गुणग्रहणसामामर्थ्यात्ससरिथ ववरिथेत्यादावपि निषेधः पेचिथेति तु नाभ्य विषयः विजातीयस्थानिकगुणाभावादिति कैयटग्रन्थे न काप्यनुपपत्तिः । अथ वा थलि च सेटीति सूत्रोक्तभाष्यरीत्या न शसददेति सूत्रे गुणग्रहणं गुणावयवपरं गुणावयवो यो ऽकारस्तस्य निषेधः तच्च नुनविथेत्यत्रैव सम्भवतीत्यदोषः २१ क्ङिति चेति सूत्रे क्ङितिप्रतिषेधे तन्निमित्तग्रहणं कर्तव्यम् । किं प्रयोजनम् उपधारारवीत्यर्थं न कर्तव्यम् ज्ञापकात्प्रतिषेधो भविष्यति यदयमिकोझल् हलन्ताच्चेति सनि कित्त्वं शास्ति तज्ज्ञापयत्याचार्यो भवत्युपधाभूतस्यापि निषेध इति भाष्यग्रन्थः। अत्र केचित् । हलन्ताच्चेति सूत्रस्य न वैयर्थ्यं दित्सतीत्यत्र

SGDF
Sri Gargeshwari Digital Foundation

नलोपसम्पादनेन कित्त्वस्य चारितार्थ्यात् । तत्र हि दम्भधातु-स्ततः सन् हलन्ताच्चेति कित्त्वं तेन नलोपः दित्सतीति । न च दम्भेः परस्यैव सनः कित्त्वविधानेन सिद्धौ सामान्यतो हलन्ता-च्चेति कित्त्वविधानमनर्थकमिति वाच्यम् । सिसृक्षति दिदृक्षती-त्यत्र सृजिदृशोर्झल्यमकितीत्यमागमनिवृत्तये कित्वस्य कर्तव्यत-या सामान्ययोगारम्भात् । समाधानं तु एवं सनि सृजिदृशोर्झ-ल्यमकित् सनि इको झल् दम्भरिति लघुनोपायेन सिद्धे हल-न्ताच्चेति ज्ञापकं युक्तमेव २२ नलोपः प्रातिपदिकान्तस्य । अत्र पदस्येत्याधिकारस्तस्य प्रातिपदिकेति लुप्तषष्ठ्यन्तमभेद सम्ब-न्धेन विशेषणम् । न च येन विधिरित्त्यनेनैवान्तग्रहणे लब्धे पुनरन्तग्रहणं व्यर्थमिति वाच्यम् । अन्तग्रहणेन क्व चित्पदस्ये-त्यस्यावयवषष्ठीत्वं बोध्यम् । तेन मादुपधायाश्चेत्यत्र पदस्येत्य-धिकारे मत्वन्तपदस्य मस्य व इति नार्थः किन्तु पदावयवस्य मतुपो मस्येत्यर्थः अत एव वृक्षवन्त इत्यादौ वत्वासिद्धिः अन्य-था वृक्षवानित्यादावेव स्यादिति भावः २३ । तस्माच्छसो नः पुंसि । ननु शसोनुम् पुंसीत्येव सूत्रमस्तु । अक इत्यनुवृत्त्या-कः परस्य शसो नुमित्यर्थः । एवं च शसः शकारस्यान्तावयवो नुमागमः पश्चात्पूर्वसवर्णदीर्घे संयोगान्तस्येति सलोपे सिद्धम् । रामानित्यादौ लिह इत्यादौ च न दोषः शसोऽकः परत्वाभा-वात् । एतान् चतुरो गाः पश्यसीत्यादावप्योकारसत्वे ऽकः प-रत्वाभावः औतोम्शसोरित्याकारे ऽकः परस्य शसोऽ भावा-दिति चेन्न । विश्वप इत्त्यादावातोधातोरित्यालोपेऽपि तस्याचः परस्मिन्नित्यत्र पञ्चमीसमासपक्षे स्थानिवद्भावेनाकः परत्वा-न्नुमापत्तेः । पञ्चमीसमासप्रत्याख्याने तु प्रवृत्तेः स्थानि-वद्भावाभावेन दोषाभावः । न चाष्टावित्यत्रात्वे कृते जश्शसो-

SGDF
Sri Gargeshwari Digital Foundation

रौशादेशे कृते अत्र नुम्स्यादिति वाच्यम् । अकारस्य परनिमित्तस्य बहिरङ्गतया ऽकः परत्वाभावः अथ वा औशादेशः प्रियतिस्र इत्यादौ रणे बाधेः अत्र समाधानं विभावनीयम् २४ हल्ङ्याभ्यो दीर्घात्सुतिस्यपृक्तं हल् । अत्र सूत्रे मनोरमायां हल्ङ्यापः सोरित्येव सूत्रयितुमुचितमित्युक्तं शब्दरत्नग्रन्थे तु सुपदन्तिस्योरप्युपलक्षणम् । तेनाबिभाराज्यमिति सिद्धम् । तत्र हि अबिभरम् इति स्थिते सकारस्य संयोगान्तलोपः रोरीति रेफलोपः पश्चाद्राज्यशब्दसमभिव्याहारे ढ्रलोप इति दीर्घः स न स्यात् । संयोगान्तलोपस्यासिद्धत्त्वाद्रेफपरत्वाभावादित्युक्तम् । अयं शब्दरत्नग्रन्थः शेखरग्रन्थेन सह विरुद्धः शेखरे तु अजर्घा इत्यादौ ढ्रलोपसूत्रस्थभाष्यप्रामाण्येनपूर्वत्रासिद्धमित्यत्र पूर्वशब्देन ढ्रलोपसूत्राग्रहणबोधनादित्युक्तम् । अत्रेत्थं विरोधपरिहारः भाष्यप्रामाण्येन प्रयोगसाधुत्वम् मतमिति प्रयत्ने प्रकृते तु तिसिग्रहणरूपो यत्न एवास्ति । नासूया कर्तव्या यत्रानुगमः क्रियते इति पङ्क्तिविंशतीतिसूत्रभाष्यात् २५ वदव्रजहलन्तस्याचः अतोहलादेरित्यस्य बाधनार्थं वदव्रज्योरुपादानम् । अन्यथा हलन्तत्वादेव सिद्धेः । नन्वत्रसूत्रे हल्ग्रहणं किमर्थम् । वदव्रज्योरच इत्येव सूत्रमस्तु वजव्रज्योर्यस्य कस्यचिदङ्गस्याचो वृद्धिः परस्मैपदे सिचीति सूत्रार्थः । अजन्तस्याङ्गस्य वृद्धिरिति तु नार्थः । इकारान्तादौ सिचि वृद्धिरिति वृद्धिविधानस्य वैयर्थ्यात् । अकारान्ते ऽचिकीर्षीदजिहीर्षीदित्यत्र तु परत्वादतो लोपेन बाधात् । आकारान्ते ऽपासीदयासीदित्यादौ फलाभावान्न वृद्धिरिति भावः । अनन्त्ये अपीपटदित्यत्रानन्त्याविकारे ऽन्त्यसदेशस्येति परिभाषया न दोष इति चेन्न । रञ्जधातौ अराङ्क्षीदित्यादावनेकव्यवधाने वृद्धिर्न

SGDF
Sri Gargeshwari Digital Foundation

स्याद्धल्ग्रहणे तु वर्णग्रहणे जातिग्रहणमिति परिभाषयाऽनेकव्य वहिते ऽपि वृद्धिरित्यर्थः २६ न पदान्ताट्टोरनाम् । अत्र सूत्रे शेखरे विशेषणेन तदन्तविधौ सिद्धे ऽन्तग्रहणं स्पष्टार्थमित्युक्तम् । पदान्ताद्वेति सूत्रे च विशेषणेन तदन्तविधौ सिद्धे ऽन्तग्रहणं पदविधित्ववारणाय । अन्यथा समर्थः पदविधिरिति परिभाषया सामर्थ्ये एव स्यात् । तिष्ठति कुमारी च्छत्रं देवदत्तेत्यादौ न स्यात् इत्यन्तग्रहणस्य प्रयोजनमुक्तम् । इदं च प्रयोजनं न पदान्तादित्यत्रापि सम्भवति । तिष्ठन्तु षट् सन्तो गच्छन्त्वित्यादौ निषेधो न स्यादिति पूर्वापरविरोधः । अत्रेत्थं परिहारः न पदान्तादिति सूत्रे ऽन्तग्रहणाभावे ऽपि न समर्थपरिभाषोपस्थितिः अनामिति निषेधाल्लिङ्गात् । अन्यथा एकपदे षण्णामित्यत्र सामर्थ्याभावेन न पदान्तादिति निषेधाप्राप्तौ अनामित्यस्य वैयर्थ्यं स्यात् । समर्थपरिभाषादृष्ट्या त्रिपादीस्थस्य न प पदान्तादित्यस्यासिद्धत्वाञ्च तत्रोपस्थितिरिति न पूर्वापरविरोधः । २७ ङसिङसोश्च अत्र ङितो ऽसीत्येव सिद्धे ङसिङस्ग्रहणं स्पष्टार्थम् । अत्र ङित्यसीति वक्तव्ये ङितो ऽसीति षष्ठ्यन्तपञ्चम्यन्तयोर्वासीति सप्तम्यन्तान्वये बीजाभावात् । किञ्च गामतिक्रान्त इत्यर्थे ऽतिगोशब्दाद्गोन्तात्तपुरुषाट्टचि कृते तस्मान्ङसि विभक्तौ पूर्वं ङसकारयोः पररूपे पश्चादनेन पूर्वरूपापत्तौ चातिगोरिति रूपापत्तेः सिद्धान्ते तु समस्तान्ङसि विधाने टचि अवादेशे एङो ऽभावे पूर्वरूपशङ्का नेति बोध्यम् । तस्मात् ङ्यसि इत्यन्तलाघवान्ङादावसि पूर्वरूपमित्यर्थे को ऽपि न दोष इति विभाव्यं नव्यैः २८ समःसुटि । अत्र मः सुटीति न्यासो ऽस्तु लाघवात् । अत्र सुटि परे समो मकार एव सम्भवति नान्यमकारस्ततश्च नान्यत्र दोषः संस्कर्तादौ सर्वत्रा-

SGDF
Sri Gargeshwari Digital Foundation

न्व्याख्यानं सिद्धमिति कश्चित् । वस्तुतः सम् सुट्संस्कार इति वाक्ये रुत्वापत्तेः । किञ्च सुडित्यागमग्रहणमाहोस्वित्प्रत्याहारग्रहणं सम्परिभ्यां करोतौ भूषणे इति सूत्रप्रामाण्यादागमग्रहणामिति चेदस्तु । संस्कारशब्दे दोषस्तस्मात्समः सुटीत्येव न्यासः २९ समः समिः अत्र सूत्रे शेखरे समोमिङ्गिति न सूत्रितम् । ङिच्चेति परिभाषाज्ञानकृतगौरवापत्तेः । अत्र रूपासिद्धिरप्यायाति । समो ऽकच्यनेकाल्परिभाषया विशिष्टस्य सम्यादेशे सम्यङ् इति रूपम् । समो मिङि तु ङिच्चेति परिभाषया ऽन्त्यादेशे सकम्यङिति स्यात् । अत्रोच्यते । बहिर्भूतकुत्सादिनिमित्तकत्वेनाकचो बहिरङ्गत्वादादेशोत्तरमेवाकजिति । अथ वा एतत्सूत्रभाष्यप्रामाण्येनात्राकचो ऽनभिधानमेव । ३० । सार्वधातुकार्द्धधातुकयोः । नन्वत्र पिदार्द्धधातुकयोरित्येव सूत्रमस्तु । पिति आर्द्धधातुके परे इगन्तस्य गुणः स्यादिति सूत्रार्थः । न च हरिष्वित्यादावतिप्रसङ्ग इति वाच्यम् । आर्द्धधातुकसाहचर्याद्धातोर्विहिते पिति परे इत्यर्थो व्याख्यानात् । अत एव लूषु धूषु । इत्यादावपि न धातोः पितः परत्वेऽपि धातुपदमुच्चार्य विहितत्वाभावाद । सार्वधातुकमपित् । इति तु कर्तव्यमेव । उष्ट इत्यादौ ग्रहिज्येति सम्प्रसारणार्थम् । वस्तुतस्तु साहचर्यमनित्यमिति ज्ञापनार्थसार्वधातुकग्रहणम् । क्त्वोऽर्थग्रहणं तु शेखरे खण्डितम् । सुच इत्येव सिद्धान्तितम् । तेन सिजभ्यस्तेत्यादौ पूर्वपरसाहचर्यमनादृत्य अभ्यस्तात्परस्य ङित्संबन्धिनो झेर्जुस् । तेन भवतेर्यङ्लुगन्ताल्लङि अबीभवुरिति । ददातेर्जौहोत्यादिकाल्लङि अददुरिति सिद्धम् । अत्रोच्यते । तिङ्शिदार्द्धधातुकेषु लाघवादित्येवास्तु । न तत्र दोषलेशः तिङि शिति आर्द्ध धातुके च परे इगन्ताङ्गस्य गुणः स्यादिति सूत्रार्थे सक-

SGDF
Sri Gargeshwari Digital Foundation

लेष्टसिद्धिः अत्र समाधानं कुर्वन्तु नव्याः इडुवुपधस्य चाप्रत्य यस्य। अत्र इदुद्भ्यां प्रकृतेरिति मुनेरभिप्रायः इदुद्भ्यां परस्य प्रकृत्यवयवस्य विसर्गस्य षत्वं विधीयते इति सूत्रार्थः इदुतोऽपि प्रकृतिसमवेतत्वेन प्रकृतिसमवेताभ्यां परस्य प्रकृत्यवयस्य विसर्गस्यषत्वविधानेनैकप्रकृतिप्रत्ययत्वसम्बन्धः तेनाविष्कृतं निष्प्रत्यूहाद्युदाहरणं बोध्यम्। तदन्यत्प्रकृत्यविहितप्रत्ययस्थानिकविसर्गस्य व्युदासः तेन कविभिः कृतमित्यादौ नास्य प्रवृत्तिः इदं सिद्धान्तमज्ञात्वा मूढो जल्पति। न न्वनेन सूत्रेण मातुः कृपेत्यादौ षत्वं स्यादित्यत आहैकादेशशास्त्रनिमित्तकस्य न षत्वम्। एकादेशशास्त्रनिमित्तकस्येति। तदर्थः अत्र ज्ञापकं कस्कादिगणे भ्रातुः पुत्रशब्दस्य पाठः अन्यथा इदुदुपधत्वादेव तत्र षत्वस्य सिद्धत्वे किं तत्र पाठेन तत्रायं पूर्वपक्षः। भ्रातुः पुत्रशब्दस्य पाठो न ज्ञापकः तत्र हि इदुदुपधस्य षत्वे कर्तव्येषत्वतुकोरसिद्ध इति एकादेशस्यासिद्धत्वादिदुपधत्वाभावादप्राप्तं षत्वमिति विध्यर्थो भ्रातुः पुत्रशब्दस्य कस्कादिषु पाठः। मातुः कृपेत्यादौ एकादेशस्यासिद्धत्वान्न षत्वम् इति मूले उक्तम्। ज्ञापकं कथमिति अत्रोच्यते षत्वतुकोरसिद्ध इति सूत्रे पदान्तपदाद्योरेकादेशोऽसिद्ध इति वार्तिकेन प्रकृते सिद्धत्वाभावः तेन परिजीषु इत्यत्र षत्वसिद्धिः ज्याधातोर्व्येञ्धातोश्च क्विपि ग्रहिज्येति संप्रसारणे पूर्वरूपे हल इति दीर्घः ततः सप्तमी बहुचने सुपि इणः परत्वात्षत्वम् अन्यथा पूर्वरूपस्यासिद्धत्वादाकारेण व्यवधानान्न स्यात् वृद्धेछत्रमित्यत्र तुक् न अन्यथा सप्तम्येकवचनेन सह ऐकादेशस्यासिद्धत्वात्तुक् स्यादेव। वस्तुतस्तु इग्यणः सम्प्रसारणमित्येवास्तु सम्प्रसारणाच्चेति न कार्यं प्रकृत्यैकाजिति प्रकृतिभावात् शावयतीत्यस्यासाधुत्वेन शुनय-

SGDF
Sri Gargeshwari Digital Foundation

तीत्यस्यैव प्रामाणिकत्वेन डापूसूत्रस्थबहुश्वा इत्युदाहरणे संप्र-
सारणाकरणेन न क्वापि दोषः तदा षत्वे कर्त्तव्ये पदान्तपदा-
द्योरेकादेशो ऽसिद्ध इति नियमः स्वीकार्य्यः एवञ्च भ्रातुः पुत्र
शब्दस्य पाठो विध्यर्थ एव कथं ज्ञापकेति विभावनीयं सुधाभिः
आडजादीनाम् ननु अजादीनामपि लुङ्लङिति सूत्रेण अडेवास्तु
एवञ्च प्रकृतसूत्रं नारम्भणीयम् । आटश्चेत्यत्र अटश्चेत्येवमस्तु
अस्वपो हसनित्यत्र तु अड्गार्ग्यगालवयोरिति सिप्यडागमे ऽपि
न दोषः अटश्चेत्यत्र धातोरित्यपकर्षात् धात्ववयवस्याटो ऽचि
वृद्धिरित्यर्थः । आणनद्या इत्यत्र अड्वक्तुमशक्यं बहुश्रेयस्यै
इत्यत्र वृद्धिरेचीति वृद्धिं बाधित्वा अतो गुण इति पररूपापत्तेः
अटो विधानसामर्थ्यं तु न बहुश्रेयस्यामित्यादौ नुड्बाधनेन
चारितार्थ्यात् अटश्चेत्यस्य तु न प्रवृत्तिस्तत्र सूत्रे धातोरित्य-
पकर्षात् इति शेखरग्रन्थः । इण धातौ शेखरे तु आटश्चेत्यस्य
प्रत्याख्याने अजादीनामप्यडागमे अतोगुणेति पररूपमाशङ्क्य
अतो गुणेत्यस्यानन्तरम् अटो न न्यासः कार्य्यः अटः पररूपं
नेत्यर्थः । तेनाटीत्यादौ पररूपं नेत्युक्तम् । एवञ्चाटो न इति
न्यासेनैव बहुश्रेयस्यै इत्यादावपि पररूपस्य निषेधे सिद्धे अ-
त्राट् वक्तुमशक्य इति ग्रन्थो विरुद्धः । अत्रेत्थं विरोधपरिहारः
अटश्चेति वृद्धिबाधकपररूपस्यैव बाधकम् अटो नेति सूत्रं न तु
वृद्धिरेचीति वृद्धिबाधकम् एवं च बहुश्रेयस्यै इत्यादौ पररूपं
स्यादेव तदर्थं चाट्करणम् अत्र प्रमाणम् अटश्चेति चकारेण
पुनर्वृद्धिविधानं बाधकबाधनार्थं तेन अटो न उस्योमाङ्क्ष इत्या
दि नारम्भणीयमिति भाष्यम् भूवादयोधातवः अत्र सूत्रे क्रि-
यावाचिनः किम् याः पश्यसीत्यादौ धातुत्वं माभूत् । न च
लक्षणप्रतिपदोक्तपरिभाषया न धातुत्वमितिवाच्यम् । भ्वादि-

SGDF
Sri Gangeshwari Digital Foundation

षु लाक्षाणकानामपि अश्वत्यादीनां दर्शनेन तद्विषये तत्परिभाषाया अप्रवृत्तेः ।

नकारजावनुस्वारपञ्चमौ झलि धातुषु ।
सकारजः शकारश्चेत्षाट्टवर्गस्तवर्गजः ॥

इत्यभियुक्तोक्तेरिति मनोरमाशब्दरत्नग्रन्थः । अत्रायं पूर्वपक्षः अश्वत्यादीनां लाक्षणिकत्वे ऽपि न तत्र परिभाषाप्रवृत्तिर्लाक्षणिकप्रतिपदोक्तउभयरूपसत्त्वे हि तत्परिभाषाप्रवृत्तिः अश्वेत्यादौ न तथा किं च धातुसंज्ञादृष्ट्या त्रिपादीस्थत्वेनानुस्वारादीनाम् । आसिद्धत्वात्वात्प्रतिपदोक्तरूपमेव पश्यति धातुसंज्ञासूत्रमिति शब्दरत्नग्रन्थो ऽनुपपन्नः अत्रैवं पूर्वपक्षः क्रियावाचिग्रहणाभावे वा करोति वा भवति इत्यादौ वेत्यस्य धातुत्वे ऽधातुरितिपर्य्युदासेनाप्रातिपदिकत्वे सुबनुत्पत्त्या पदत्वाभावात् तिङ्ङतिङः इति तिङन्तात्परस्य तिङन्तस्य निघातो भवतीत्यनेन निघातो न स्यादिति शेखरग्रन्थः । अत्रेदं बोध्यम् । वा करोतीत्यादौ । न दोषः अर्थवत्सूत्रे धातुग्रहणं न कार्य्यम् । एवं च वा इत्यस्य धातुत्वे ऽपि प्रातिपदिकसंज्ञा सिध्यत्येव । न च धातुग्रहणाभावे अहन्नित्यत्र प्रातिपदिकत्त्वे सति नलोपः स्यादिति वाच्यम् । न लोपः प्रातिपदिकेत्यत्र न लोपो ऽतिङिति न्यासेन तद्वारणम् रामानित्यादौ नलोपः नत्वविधानसामर्थ्यात् अन्यथा लोपमेव विदध्यात् राजीयतीत्यादौ तु न दोषः प्रत्यासत्या तिङ्निरूपितं यस्य पदत्वं तद्भिन्नस्य लोप इत्यर्थात् । अचः परस्मिन्पूर्वविधौ अत्र सूत्रे शेखरे अजादेशत्वेन वस्तुतो ऽजादेशः स्थानिवदित्यर्थः । न त्वादेशं विधाय किं चिदुद्देशत्वे एवार्थस्तेन णिलोपादेः स्थानिवत्वासिद्धिः अत एव ण्यन्ताणिचि अवीवददित्यादौ सिद्धयर्थे चङ्परनिह्रास

SGDF
Sri Gargeshwari Digital Foundation

इति निषेधः सार्थकः । जुहुतइत्यत्र तु श्लौ परनिमित्तत्वाभावेन शपः अपरनिमित्तत्वेन परस्य ण्या लुको ऽपि तत्त्वेन शप्त्वेन स्थानि तया भावेन स्थानिवत्त्वाभावात् । शप्त्वमाश्रित्य न गुणइत्युक्तम् । अत्र पूर्वापरविरोधः स्पष्टमेव वस्तुतो ऽत्राकारस्यैव लुग्विधिस्थानिवद्भावेन दुर्वारः न च लघुनि चङ्परे ऽनग्लोपे अत्र सूत्रे शेखरे चङ्परे इति बहुब्रीहिः परग्रहणसामर्थ्यात् तद्विशेष्यं च णिजेव न तु लब्धाङ्गस्येत्यावर्त्य अङ्गसंज्ञानिमित्तकमित्यर्थात् अत एव श्रिप्रभृतीनां न सन्वत्वम् इदं चिन्त्यम् । अशिश्रियत् अदुद्रुवादित्यत्र सन्वत्वे न दोषः लघुत्वाभावेन दीर्घाभावः न चेत्वं स्रवतीत्यादिसूत्रेणाभ्यासस्योवर्णस्य इत्वमपि न अवर्णपरधात्वक्षरपरत्वाभावात् निषेधस्तु न प्रयोजनं चङ्यन्यतरस्यामिति चङि उपोत्तमस्य विकल्पोदात्तत्वविधानात् तदभावे नचित्स्वर श्रिप्रभृतिपदम् अचकमतेत्यस्योपलक्षणं रूपे विशेषाभावेन कमेर्णिङीत्यस्यानन्तरम् । अपवादभूततद्बाधनाय लुङि ङिति वदेत् लुङ्परे कमेश्चङिति तदर्थः । अत्र सुधियो विभावयन्तु ॥ वोतोगुणवचनात् अत्र । उतः किम् शुचिरिति मूले उक्तम् । अत्र हि कृदिकारादिति ङीषो विकल्पस्य इष्टत्वेन शुक्लेति प्रत्युदाहरणं बोध्यमिति शेखरे उक्तम् इदमशुद्धं खरुसंयोगोपधान्नेति निषेधस्य जागरूकत्वात् खरुसाहचर्य्येण संयोगोपधो ऽपि उकारान्त एव गृह्यते इति मते शुक्लेति प्रत्युदाहरणं सम्यगेव श्यामेत्यत्र तु न कश्चिद्विवादः ॥ हलिसर्वेषाम् अत्र सूत्रे हलिकिम् । देवायिह इति प्रत्युदाहरणं मूले उक्तम् तदसङ्गतमिव भाति लोपःशाकल्यस्येति एतद्विषये ऽपि देवायिहेत्यादौ च पदादिति व्योर्लोपः स्यात्तर्हि लोपः शाकल्यस्येति व्यर्थमेव स्यात् अत्रोच्यते लोपः

SGDF
Sri Gargeshwari Digital Foundation

योर्लोपः हल्ग्रहणाभावे लघुप्रयत्नयकारे देवायिहेत्यत्र लोपः स्यादित्याशयः॥ मोऽनुस्वारः अत्र सूत्रे पदस्येति किं गम्यते इति प्रत्युदाहरणमुक्तम्। असङ्गतम् नश्चापदान्तस्येत्यत्र मस्यानुवृत्तौ नस्य मस्य चापदान्तस्यानुस्वार इत्यर्थः। इदं च नियमार्थं करिष्यते अपदान्तस्य मस्य चेदनुस्वारस्स्यात्तर्हि झल्येव गम्यते इत्यादौ नानुस्वारप्राप्तिः न च विपरीतनियमस्स्यात् झल्यनुस्वारश्चेत्तर्हि अपदान्तस्यैव मस्येति हरिं सेवते इत्यत्र न स्यात् सूत्रं तु हरिं नमतीत्यादौ चरितार्थमिति वाच्यम्। हे मपरे वेति सूत्रेण मकारस्य मकारविधानानर्थक्यापत्तेः तद्धि मोऽनुस्वार इति प्रोक्तमनुस्वारबाधनार्थं विपरीतनियमे तु अनुस्वारप्राप्तिरेव नेति नेत्येवसिद्धे म इत्युक्तिर्मो न इति प्रशाम् झलयतीत्यादौ नत्वबाधनार्था निषेधस्त्वनन्तरत्वादनुस्वारस्यैव स्यात्। लोटो लङ्वत्। नन्विदं सूत्रं मास्तु लोटः स्थाने लोङ् प्रत्ययोऽस्तु तेन ङित्त्वात्तामादयः। टित्त्वाट्टित आत्मने एत्वसिद्धिरिति चेन्न। टोटकारेणैव सिद्धेः लोटो लङ्वदिति आतिदेशिकमनित्यमिति ज्ञापनार्थं तेन जुहतुरित्यत्र सिजभ्यस्तेति जुसविदोलटो वेत्यतो वेत्यनुवर्त्य व्यवस्थितपरिभाषया श्रये मजसवर्णन्तु न सम्भवति भाष्ये व्यवस्थितविभाषासु अपाठात्॥ स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्। अत्र सूत्रे उपसर्जनात् किम्। सुशिखेति मूले प्रत्युदाहृतम्। तदयुक्तम्। शोभना शिखा सुशिखेति समासे अन्तरङ्गत्वाट्टापि अदन्तत्वाभावान्ङीषो ऽप्राप्ते अत एव शेखरे सुशिखेति प्राक्षिप्तः पाठः। शिखेत्येवप्रत्युदाहरणं बोध्यमित्युक्तम्। तदपि न युक्तम्। अस्वाङ्गपूर्वपदाद्वेत्यतो अत्र अस्वाङ्गपूर्वपदादित्यनुवर्त्य तेन करमुखा कल्याणपाणिपादा इत्यत्र न ङीष् अत्र हि अस्वाङ्गपूर्वं यत्कल्याणेति ततः परं

SGDF
Sri Gargeshwari Digital Foundation

पाणिपादिति तत्स्वाङ्गवाचकान्न स्वाङ्गसमुदायस्य स्वाङ्गवाचकत्वाभावात् पादशब्दस्य स्वाङ्गवाचकपरत्वाभावात् पाणिशब्दस्य अस्वाङ्गवाचकत्वादिति विभावनीयम् । नोपधायाः । अत्र पञ्चानामित्यत्र पकाराकारस्य दीर्घवारणयोपधाग्रहणमिति शेखरे उक्तम् उपधाग्रहणाभावे पञ्चानामित्यत्र उभयोर्दीर्घप्राप्तौ अनन्त्यविकारे अन्त्यसदेशस्य भवति अनन्त्योद्देश्यके कार्ये अन्त्यसदेशानन्त्यसदेशयोर्युगपत्प्राप्तौ अन्त्यसदेशस्यैवेति तदर्थः । अनयैव पञ्चानामित्यत्र पकाराकारस्य दीर्घाप्राप्तौ व्यर्थमेवोपधाग्रहणं क्रियमाणे ऽपि उपधाग्रहणे हंसशिरांसि इत्यत्र यस्याङ्गे उचिताकाङ्क्षाया सर्व्वनामस्थानग्रहणेनाङ्गे ऽस्यविशेषणम् । एवञ्चोभयोर्दीर्घप्राप्तौ परिभाषयैव वारणमुपधाग्रहणं चात्र पूर्वमात्रोपलक्षणार्थं परिभाषिकस्यासम्भवादिति परिभाषयैव सर्वत्र निर्वाहे उपधाग्रहणं क्वापि न कार्य्यमिति चेदत्रोच्यते । अन्त्यविकारे इति परिभाषायामुदात्तनिर्देशः क्रियते प्रतिविधेयं प्रवर्तते तत्फलन्तु तिङ्ङतिङ इत्यत्र नास्याप्रवृत्तिस्तेन देवदत्तोऽभवदित्यत्र पूर्वस्यानुदात्तत्वसिद्धिः विकाराकारस्यैव स्यादेवं च प्रकृते उदात्तनिर्देशाभावेनास्या अप्रवृत्तौ पकाराकारस्य दीर्घः स्यादेव तद्व्यावृत्त्यर्थमुपधाग्रहणमिति शेखराशयः ॥ नसंयोगाद्वमन्तात् ॥ वान्तमान्तसंयोगात्परस्यानो ऽकारस्य लोपो न स्यादित्यर्थे न कुत्राप्यनुपपत्तिः समाधानं मृग्यम् । भस्य टेर्लोपः । नन्वत्र भाड्डित् इत्येवसूत्रमस्तु । भसंज्ञाकात्पथ्यादेः परो यः सचडित् इत्यर्थः । एवं च टेरिति टिलोपः अनुवृत्त्यर्थमपि न लोपग्रहणमेतदग्रेऽष्टाध्याय्यां गोतोणिदित्यादिसूत्राणां पाठदर्शनादत्र समाधानं मृग्यम् । गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः । तेन व्या

SGDF
Sri Gurgeshwari Digital Foundation

घ्री कच्छपी अश्वक्रीतीत्यादौ सुबुत्पत्तेः प्रागेव समासे विशिष्ट-स्य जातिवाचकत्वेन जातेरस्त्रीविषयादिति ङीष् अन्यथा स्वा-र्थादीनां सुप्स्थितौ सत्यां लिङ्गबोधकटापि ततः सुबुत्पत्तौ ततः समासे ऽदन्तत्वाभावात् ङीष् न स्यात् । अत्रायं पूर्वपक्षः । इयं परिभाषा मास्तु उपसञ्जनिष्यमाणनिमित्तो ऽप्यपवाद उप-सञ्जातनिमित्तमप्युत्सर्गं बाधतइत्यनया दधतीत्यादौ यथा पूर्वम न्तादेशो न भवति एवं प्रकृते ऽपि टाप् न भवति । न चाद-भ्यस्तादित्यस्यानवकाशत्वमिति वाच्यम् । जक्षतीत्यादौ चारि-तार्थ्यात् । न च गतिकारकेति परिभाषाया अभावे कौम्भका-रयो न स्यात् सुबन्तेन समासे कारशब्दान्ङीष् स्त्रीभ्यो ढगि-ति सूत्र स्य स्त्रीप्रत्ययान्तात् ढगिति नार्थः । किन्तु स्त्रीवाचका द्ढगित्येवार्थः । अतएव मातृष्वसुर्ढकि टिलोपवचनं चरितार्थम् । अन्यथा स्त्रीप्रत्ययान्तत्वाभावाड्ढको दुर्लभत्वेन तद्व्यर्थं स्यात् । अत एव ऋष्यन्धकेति सूत्रे भाष्ये जम्बुशब्दश्चतुष्पादजातिवाच कस्तस्माद्यच इति ढञि प्राप्ते स्त्रीभ्यो ढगिति ढप्राप्ते तत्र पूर्ववि-प्रतिषेधेनेत्युक्तं तदसङ्गतं स्यात् जम्बुशब्दस्य स्त्रीप्रत्ययान्तत्वा-भावात् स्त्रीभ्यस्तु न ढक् अनभिधानाच्छिवादिपाठाद्वा अत्र समाधाने विभावयन्तु सुधियः ॥ माषवपनीत्यादौ णत्वं न स्यात् न कारस्य प्रातिपदिकान्तत्वाभावादिति समाधानम् । अर्थवद्ग्रहणे नानर्थकस्य अत्र व्रश्चादिसूत्रे राजेः पृथक् भ्राजि-ग्रहणं ज्ञापकमिति मनोरमायां दीक्षितैरुक्तं तद्विपरीतं तु शब्द-रत्ने भट्टैरुक्तं व्रश्चादिसाहचर्य्येण धातुसंज्ञस्यैव राजेर्ग्रहणम् एवं च भ्राजन्तर्गतस्य राजेर्धातुत्वाभावेन तत्र षत्वासिद्धिरिति ज्ञापकत्वमयुक्तम् । अत्रेयं शङ्का यद्यत्र साहचर्य्यपरिभाषाप्रवृत्ति-रिष्टा त्तर्हि शकारवच्छकारविषये ऽपि साप्रवर्तेत एवं च

SGDF
Sri Gargeshwari Digital Foundation

शकारान्तस्य धातोरेव षत्वं स्यात् तदा निशाशब्दस्य निशादेशे निड्भ्यां निड्भिरित्यादौ षत्वानापत्तिस्तस्मान्मनोरमोक्तमेव सम्यक् वस्तुतस्तु साहचर्य्यपरिभाषाप्रवृत्तावमुं दोषं विभाव्यैव शब्दरत्नग्रन्थे किञ्चे त्यादिना युक्त्यन्तरमुक्तं तच्च ऋकारानुबन्धस्य राजग्रहणेन भ्राजन्तर्गस्य राजेर्न ग्रहणम् अत्र ऋकारस्य समुदायानुबन्धत्वात्समुदायानुबन्धस्यावयवानुवन्धत्वाभावात् इति न काप्यनुपपत्तिः । अथ वा प्रथमोपात्तत्वाद्व्रश्चादिविषयएव साहचर्यपरिभाषाप्रवृत्तिः शकारवच्छकारविषये सा न प्रवर्ततइति न किञ्चिद्दूषणं निड्भ्यां निड्भिरित्यादीनामिष्टत्वात् अर्थे प्रथमेत्येव सारं । तत्र कस्यार्थ इति जिज्ञासायां यस्मात्स्वादिविधिस्तस्यार्थ इति फलितम् । एवं च मृडानीहिमानीत्यादौ पुंयोगमहत्वादेः ङ्यतान्नियतभानेन प्रथमा सिध्यतीत्यपरमनुकूलं यथाश्रुते तु सा न स्यादिति मनोरमा ग्रन्थः एतदुपरीयमाशङ्का प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषया मृडानीहिमानीति प्रातिपदिकं तस्मात्पुंयोगादीनां नियमेन भान मिति कथं प्रथमाया अनुपपत्तिः । अत्र शब्दरत्नग्रन्थः प्रवृत्तिनिमित्तं तदाश्रयश्च प्रातिपदिकार्थः तदपेक्षया लिङ्गमात्रं यत्राधिकं भासते तत्र प्रथमेति वाक्यार्थः । मृडानीत्यादौ न लिङ्गमेवाधिकं भासते किन्तु पुंयोगोऽपि एवं च प्रथमा न स्यादिति तदाशयः । तदपि चिन्त्यमेव मनोरमाकारमते प्रवृत्तिनिमित्ततदाश्रयस्याप्रातिपदिकार्थत्वादिति विभावनीयम् ॥ न मुने अत्र न नेत्येवास्तु नामि अत्र नुटीत्येवास्तु यत्र नुटि दोषस्तत्रागमान्तरकरणेन परिहरणीयः । अदर्शनं लोपः । अत्रादर्शनमित्येवास्तु तस्य लोप इति सूत्रं मास्तु । बहुवचने झल्येत् इत्येव सुवचम् ॥ आसुडा-

SGDF
Sri Gargeshwari Digital Foundation

गम इत्यपि तथा पदान्ताद्वा विशेषणविशेष्यभावेनान्ते लब्धेऽन्त-ग्रहणं पदविधित्वबोधनद्वारा समर्थपरिभाषानुपस्थित्यर्थं तेन तिष्ठतु कुमारीच्छत्रं हर देवदत्तेत्यादौ न विकल्पस्तुक् इत्यत्र शेखरे उक्तं युष्मत्प्रकरणस्थौदनं पच तव भविष्यतीति प्रतीक-स्थसमर्थपरिभाषा त्वत्र न प्रवर्तते तस्या एकार्थीभावविषयत्वा-दितिशेखरविरोधात् अत्र विरोधं परिहरन्तु विचक्षणाः। तस्मि-न्नितिनिर्दिष्टेपूर्वस्य। अत्र सप्तमी निर्दिष्ट इति तु न सूत्रितं सप्तम्यां जनेर्ड इत्यादौ सप्तम्यन्ते पदे इत्यर्थापत्त्या जायते ग्रामे देवदत्त इत्यनिष्टापत्तेः। न च स्वं रूपमिति परिभाषया सप्तमी-वाच्यप्रत्ययान्तार्थे परे पूर्वस्य कार्यं स्यादित्यर्थोऽङ्गीक्रियते तत्र च पूर्वस्य स्थाने कार्याभावात्सप्तमीत्वाच्चाप्रवृत्त्या न दोषः। अत्र न्यासे दोषेऽपि ङिप्रत्ययमारभ्य सुपः पकारेण ङिप् प्रत्याहारमाश्रित्य ङिप्निर्दिष्टे पूर्वस्येति न्यासः सुवचः॥ अदस औसुलोपश्च। अदसः सोर्डाविति तु न सूत्रितम्। टिलोपे कृते नित्यत्वात्सत्त्वं बाधित्वात्यदाद्यत्वेऽसावित्यसिद्धिरिति शेखरे उक्तम्। तदसङ्गतम् तथा हि डौ आदेशः त्यदाद्यत्वापवादः स-त्यपि सम्भवे इति न्यायेन एवञ्च टिलोपापेक्षया परत्वात्सत्त्वे पुनः प्रसङ्गविज्ञानात् टिलोपे असावितिसिद्धिः सकृद्गतिन्याया-ङ्गीकारे तु टिलोपे नित्यत्वात्सत्वे कृते तदोरिति सूत्रे सकृद्गति-न्यायेनादस इति विभक्तिसत्त्वविधायकानियमेन भाष्ये अनत्य-ग्रहणप्रत्याख्यानेन सत्त्वासिद्ध्या अदोषात्। अदसस्सोर्लोप इत्येवास्तु न चासकौ स्त्रीत्यादौ प्रत्ययस्थादितीत्त्वप्रसङ्गः। णि-त्वसामर्थ्यात्पूर्वम्वृद्धावदन्तत्वाभावादापोऽप्रसक्तेः ङीपि असि-द्धत्वं णित्वसामर्थ्यादेव न पूर्ववदश्ववडवौ द्विर्वचनतन्त्रमिति प्रतीकमुपादाय तदयुक्तम्। अत एव पूर्ववदिति चरितार्थमन्य-

SGDF Sri Gurgeshwari Digital Foundation

थाश्ववडवाविति निपातनात्सिद्धेः किन्तेन समुदायस्य पूर्वपद-लिङ्गत्वेऽपि उत्तरपदाद्ययोनिवृत्तिरश्ववडवपूर्वपराधरोत्तराणा-मिति निर्देशात् अश्ववडवाविति तु समुदायस्यान्तत्वाभाच्छी-भावाप्राप्त्या वृद्ध्यासिद्धम् । अश्ववडवशब्दार्थः पूर्वपदलिङ्गं ल-भते इत्यर्थे पुंस्त्वविधानप्रयोगे चरितार्थम् । सुन्दराश्ववडवा-वित्युक्तमुद्देश्यतावच्छेदकाक्रान्तत्वेन स्वास्मिन्स्वप्रवृत्तिरिति न्या-येनानेनैव वात्र समाहारद्वन्द्वे कृते सनपुंसकमित्यत्र तच्छब्देनैत-द्विहितसमाहारद्वन्द्वे परामृष्टे तत्र च पञ्चाश्ववडवाविति स्यात्तदे-तद्विहितसमाहारद्वन्द्वविषयकं सनपुंसकमिति ह्रस्वत्वे निर्देशोप-पत्तिः इतरेतरयोगे साहित्यस्य विशेष्यवर्तिपदार्थस्य प्रकारत्वे प्रत्ययग्रहणपरिभाषा तदा नियमेऽपि आवन्तात् परस्याङ्गसञ्ज्ञा-निमित्तस्य औङः शी आबन्तात् परस्य शीत्यर्थे वा श्यादेशो दुर्वारः प्रकृतेऽत एवाधिकसंख्येत्वादिनिर्देशाः खट्वाया अर्द्धेऽर्द्ध-खट्वे घटखड्गेत्यादिलौकिकप्रयोगश्च सङ्गच्छते अत्र समाधान-मूहनीयम् । न लोपः सुबूस्वरसंज्ञातुग्विधिषु कृति । अत्र सूत्रे शेखरकृतोक्तम् संज्ञायां दत्तदण्डिनौ दण्डिदत्तौ अत्र नलोपे दण्डिन्शब्दस्य घित्वेन पूर्वनिपातापत्तिरिष्यतेत्वनियमः अ-सिद्धत्वे तु घित्वाभावात्सिद्ध्यति न च पूर्वनिपाते नलोपो न-लोपे च पूर्वनिपात इत्ययुक्तं यस्य पूर्वपदत्वे घित्वं भावि तत् पूर्वमेव प्रयोक्तव्यमित्यर्थान्न दोष इति तु न द्वन्द्वे घीत्यत्र घिपद-स्य भाविघित्वे लक्षणायाम्मानाभावेन सम्प्रति घिसंज्ञकं पूर्वं प्रयोज्यमित्यर्थे सम्प्रति दण्डिन्नित्यस्य घित्वाभावादनियमेन रूपद्वयसिद्धौ प्रकृते सञ्ज्ञाग्रहणं त्याज्यम् ॥ ननु लाक्षणिक-पदानङ्गीकारे हरिच्छत्रमित्येकमेव तत्र लक्षणास्वीकारेऽग्रे हरि-शब्दस्य भाविनातुका इकारान्तत्वाभावेन घित्वस्यासपत्स्यमा-

SGDF
Sri Gargeshwari Digital Foundation

नत्वादनियमः सिद्ध्यति तथा च हरिच्छत्रेच्छत्रहरी इति रूप-द्वयम् अन्तरङ्गेघित्वे तुकोऽसिद्धत्वे हरिच्छत्रे इत्येकमेव षत्व-तुकोरित्यत्र तुग्ग्रहणे लुकि अन्तरङ्गपरिभाषया अप्रवृत्तिरतो नियमे रूपद्वयम् । किं चात्र प्राचीनमते अन्तरङ्गपरिभाषाया-सिद्धत्वे वा एकरूपनिर्वाहः माणिकलशौ इत्येकघिपदे लक्षणा-ङ्गीकारे तद्भावे सम्प्रति घित्वाभावादनियमे रूपद्वयं स्यात् तद्धि घित्वे कर्तव्ये उत्तरपदानिमित्तकह्रस्वस्यासिद्धत्वे घित्वस्याप्रवृत्तौ रूपद्वयम् अथ वा लक्षणहेत्वोः क्रियाया इति निर्देशेन द्वन्द्वे घि-त्वस्य अनित्यत्वाङ्गीकारस्त्वयाप्यवश्यंकर्तव्यः इत्थं सति द-ण्डिनावित्यस्य सिद्धिर्निष्प्रत्यूहा इति कृतमिति समाधानं वि-दाकुर्वन्तु कृतबुद्धयः ॥ यासुट् परस्मैपदेषूदात्तो ङिच्च । अत्र-यास्परस्मैपदेष्वित्येवास्तु । पदद्वयं त्याज्यम् । अत्र सूत्रे लिङ धातो राक्षेपे शपि कृते यासूनिरवकाशस्तेन शपूबाधकः यास् पूर्वंप्रवर्तते पश्चादुत्सर्गो ऽपि भवति आक्षिप्तस्य शाब्दबो धे ऽन्वये तु सत्यपि सम्भव इति न्यायस्यानित्यत्वे सत्यपि-संभवस्थाने यत्र बाधस्तत्रापि क्वचिदुत्सर्गः प्रवर्तते तेन प्रकृते-यासि कृते शप् भवतीति तदनित्यत्वज्ञापकः सो ऽचीत्यादि-निर्देशः अन्यथा त्यदाद्यत्वाप्राप्तियोग्ये ऽचरितार्थम् अत्वे कृते ऽपि सत्वं भवतीत्यतः सत्वं त्यदाद्यत्वापवादकं तद्विषये त्व प्राप्त्या सदइति स्यादतो ज्ञापको ऽयं तदनित्यत्व किदाशि-षीत्यस्यानन्तरं लिङ्याद्धधातुकमिति कर्त्तव्यं पूर्वसूत्रात्पदद्व-यमनुवर्त्याशिषि लिङिपरे यास् आर्द्धधातुकसंज्ञ इत्यार्धधा-तुकसंज्ञाविधानसामर्थ्याच्छासो धात्वधिकारोक्तत्वाभावे ऽपि आर्द्ध धातुकसंज्ञा भवतीति भवतेर इत्यादिनिर्देशात् कर्त्रर्थक-त्वाभावे ऽपि क चित्सार्वधातुके शप् भवतीति ज्ञापनात् तेन

SGDF
Sri Gargeshwari Digital Foundation

निरर्थकयासि परे ऽपि शप्सिद्धः । एवञ्च जागर्य्यादित्यादावपि विशेषविहितेन किच्त्वेनातिदेशिकस्य सार्वधातुकमपिदिति ङित्वस्य बाधो ऽतो ङिद्भिन्नप्रतिषेधविषयत्वाद्गुणः सिद्धः समाधिमत्राकलयन्तु सूक्ष्मार्थदर्शिनः ॥ अल्लोपो नः ॥ अत्रानो नश् इति सूत्रमस्तु । न च प्रियाष्ट्न इत्यादावल्लोपे तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति वार्तिकेन स्थानिवद्भावात् ष्टुत्वं न नशादेशे तु अञ्झलादेशत्वात्स्थाकृत्यां नुपसर्जनादित्यस्य साफल्ये सति ङीपि सुलोपे लक्ष्मीत्यपि कथं तदन्तविधौ ज्ञापकतेति स्त्रियामिति सूत्रे भाष्ये उक्तम् । तत्र लक्ष्मीशब्दे आचारक्विपो ऽनभिधाने ऽनुपसर्जनादिति सूत्रं तदन्तविधिं ज्ञापयतीति ह्रस्वनद्येति सूत्रस्थभाष्येण सह स्त्रियामेतदिति भाष्यविरोधलेशो ऽपि हलन्तेभ्यः सामान्यानभिधाने ऽपि आचारक्विवन्तप्रकृतिककर्तृक्विपः एतेन भाष्याशयमबुध्वा नेत्रे निमील्य व्याचक्षाणेनान्तरङ्गानपीति परिभाषेन्दुशेखरश्चिन्त्य इति परास्तम् ॥ न पदान्तद्विर्वचन अत्र सूत्रे वेतस्वानित्यादिशेखरेण लोपः शाकल्यस्येति सूत्रे अशिकिमित्यादि किञ्च स्थानिवत्वनिषेधं विनास्य पदान्तत्वासिद्ध्यात्र निषेधाप्रवृत्तिः स्थानिवत्त्वनिषेधज्ञाने तन्निर्णये च स्थानिवत्त्वाभावाज्ञानमित्यन्योन्याश्रयस्तत्राप्रवृत्तौ बीजमित्यन्तः शेखरो विरुद्धोपादान इति सिद्धे पदान्ते ह्यत्र निषधेः स्थानिवद्भावे सति यः पदान्त इति यावत् । यथा कानि सन्तीत्यादौ वेतस्वानित्यत्र स्थानिवत्वेन हि पदान्त इति अत्रार्थे समादधतु कुशाग्रबुद्धयः उत्तरखण्डस्यैव धातुत्वमिति शेखरे प्रयत्नश्चेत्यादि प्राग्धातोरित्यनेनोत्तरखण्डात्पूर्वमुपसर्गाप्रयोगः स्यादिति दूषणं न ॥ स्थादिष्व-

१ अत्र ग्रन्थत्रुटिः । प्रतिभाति ।

SGDF
Sri Gargeshwari Digital Foundation

भ्यासे न चाभ्यासस्येति सूत्रेणोपसर्गात्परेषामेव नान्येषामिति सूत्रवैयर्थ्येनोपसर्गा अभ्यासात्पूर्वमेव प्रयोक्तव्या इति ग्रहीज्यावयिव्याधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च अत्र सूत्रे वयिग्रहणं न कर्तव्यं व्येञः सम्प्रसारणे कृते वचिस्वपीत्येव सिद्धम्। वेञ इति निषेधस्तु लिटि वयो इतिज्ञापकान्नेति बोध्यम् । ब्रह्मभट्टैरुक्तम् समाननिमित्तकस्यैव त्रैपादिकस्य ग्रहणेनादोषात्तत्रार्थे प्रमाणं न दृश्यते । भाष्यादिकं केवलविरोधपरिहारायैवेदमुक्तम्। समाधानमत्र विभावयन्तु सुधियः ॥ शर्परे विसर्जनीयः। अत्र मनोरमायां शर्परे नेत्युक्तेऽनन्तरत्वात्। सत्वस्यैव बाधकं स्यान्नतु ≍क≍पयोस्तथा च वासः क्षौममद्भिः ≍क्षालितमित्यत्र द्वौ दुर्वारावित्युक्तमिदञ्च न सम्भवति कुप्वोरिति सूत्रं शर्परे एतद्विषये ≍क≍पसम्पादनेन चरितार्थम् कः करोतीत्यादौ सत्वजिह्वामूलीयादिप्रसङ्गे सत्वदृष्टया क≍पयोरसिद्धत्वात्सत्वंस्यादित्याशङ्क्य शर्परे नेत्यनुवर्त्य शर्परयोः कुप्वोस्तु क≍पौ नेत्यर्थेन प्रकृते दोषाभावः । किञ्च शब्दबलेन विसर्जनीयस्य सोऽशर्पर इति सूत्रे ऽपि कुप्वोरिति सूत्रे अशर्पर इत्यनुवृत्त्या तयोरशर्परे प्रवृत्त्या चाद्विसर्ग इत्यर्थलाभानापत्तिरित्युक्तम् तत्र विसर्जनीयस्येत्यनुवर्त्य तच्चावर्त्योत्तरसूत्रे क≍पाविति प्रथमान्तसाहचर्येण प्रथमया विपरिणम्य चाद्विसर्ग इत्यर्थः सुलभः॥ यासुट् परस्मैपदेष्विति सूत्रेऽङिच्चेति विहाय ङ्यासुट् परस्मैपदेषूदात्त इत्येव तु न सूत्रितम् । तथा सति किदाशिषीत्यातिदेशिकस्य कित्वस्य इज्यादित्यादौ सम्प्रसारणसम्पादनेन चारितार्थ्याज्जागर्य्यादित्यादावौपदेशिकङित्वस्य विशेषविहितेनातिदेशिकेन कित्वेन बाधस्य वक्तुमशक्यत्वात् ततश्च जाग्रोतीति सूत्रेण गुणो न स्यात् विचिणल्ङिङ्ख्वो ऽन्यस्मिन्वृद्धिविषये प्र-

SGDF
Sri Gargeshwari Digital Foundation

तिषेधविषये चेति सिद्धान्तात् मम तु नायं दोषः आतिदेशिकेन विशेषविहितेन कित्वेनातिदेशिकस्य ङित्वस्य बाधो वक्तुं शक्यते । न चैवमपि क्यासुटि कृते किदाशिषीति सूत्रं मास्त्विवति महल्लाघवमिति वाच्यम् । विधिलिङ्यपि वच्याज्जागर्य्यादित्यादौ संप्रसारणगुणौ स्यातामित्यलं बहुना ॥ डाबुभाभ्यामन्यतरस्याम् ॥ अत्रसूत्रे मनोरमायामन्यतरस्यामिति योगं विभज्य बहुधीवरीत्यादिरूपं संसाध्य बहुव्रीहौ वेति वचनमुक्तम् योगविभागसिद्धं न तु पाणिनिकृतं सूत्रमित्युक्वा भाष्ये तु सूत्रभङ्गेन समाहितं तद्यथा अनो बहुव्रीहेरित्यस्यानन्तरम् उपधालोपिनो वेति सूत्रमस्तु अन उपधेति प्रदेशान्तरस्थं सूत्रं डाप्सूत्रे ऽन्तरस्यां ग्रहणं मास्त्विवति चोक्तम् । अत्र चेत्यस्यानन्तरं मनोरमायां प्रतीकमुपादायानो बहुव्रीहेर्डाबुभाभ्यामनुपपसर्जनादूपधालोपिनो वेति पाठ्यमिति भावः । यथाश्रुते ऽनुपसर्जनादित्यस्य संबन्धो दुर्घटः अत एव उद्दामानि पुराणान्यतिक्रान्ता नगरीत्यत्र ङीन्नेति चोक्तं शब्दरत्ने । अनउपधेति सूत्रे शेखरे ऽनुपसर्जनादित्यनुवृत्तमन्यत्र न सम्बध्यते तस्य गृह्यमाणविशेषणतया गृह्यमाणस्यानो बहुव्रीहावनुपसर्जनस्यासम्भवात् ध्वनितं चेदं वनो रचेति सूत्रे भाष्ये तत्र ह्यनो बहुव्रीहेरित्यस्यानन्तरमुपधालोपिनो वेति न्यासो दर्शित इति चोक्तम् । उभयोः परस्परविरोधः स्पष्ट एवेति विरोध परिहरन्तु शाब्दिकाअनुपसर्जनात् अधिकारो ऽयं यूनस्तिरित्यभिव्याप्य अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयतीति मूलग्रन्थस्त्वाचारक्विबन्तप्रकृतिककर्तृक्विबन्तानामनभिधानमेवैतद्भाष्यप्रामाण्यादिति शेखरस्तस्यायम्भावः यद्यप्याचारः क्विबन्तात्कर्तरि क्विप्युपसर्जनत्वमिति परं तु तत्रालोपस्यसत्वादकाराभावाट्टिड्ढेति सूत्रस्य

SGDF
Sri Gargeshwari Digital Foundation

प्राप्त्यभावादेव ङीपोवारणं भविष्यतीत्यनुपसर्जनादित्यस्यात्रोपयोगाभावाद्भाष्यकारोक्तज्ञापकता सुस्थितेत्याचारक्विबन्तप्रकृतिककर्तृक्विपो ऽनभिधानाभावादेतादृशलेखनस्योपयोगाभावाच्छेखरो अनड्वानिवाचरति इत्यर्थे अनडुहशब्दाद्गौरादिपठितादाचारक्विबन्तात्कर्तरि क्विप्यनुपसर्जनादित्यस्य फलं स्पष्टमेवेति भाष्यकारोक्तज्ञापकता विरुद्धा अतो ऽनाभिधाने एतद्भाष्यस्यैव मानत्वाल्लेखनस्य चेदानीमुपयोगः स्पष्टएवेति शेखरः संगच्छते । न चैवमपि ह्रस्वनद्येति सूत्रे कस्यामो ग्रहणमित्याशङ्क्य कास्प्रत्ययेतिविहितस्य सानुबन्धकत्वादित्युक्त्वा तत्रामो मित्त्वादथ वा फलाभावाद्धल्ङ्याब्भ्यो यद्यचारक्विप् सम्भवति तर्हि मिदचोऽन्त्यात्परविषयविशेषसत्वादुक्तनुड्विधायकशास्त्रस्थभाष्यासङ्गतिः स्पष्टैवातो हलन्तेभ्यस्सामान्यत आचारक्विप् नास्तीति क्लृप्त एव इति स्त्रियामिति सूत्रस्थ भाष्यप्रामाण्यादिति शेखरो विरुद्ध एवेति वाच्यम् । नुड्विधायकसूत्रस्थेन भाष्येण लिङ्ग आचारक्विप् एव हलन्तेभ्योऽनभिधानं तत्रैवामः प्रवृत्तिसत्वात्कर्तृक्विप् परस्य तस्य तेभ्योऽनभिधानं मानाभावादेतेनान्तरङ्गानपीति परिभाषाज्ञापनावसरे सामान्यतो हलन्तेभ्यो नुड्विधायकसूत्रस्थभाष्यप्रामाण्येनाचारक्विप् नास्तीति परिभाषेन्दुशेखरोक्तिरुगिदचामितिसूत्रे । आचारक्विप्प्राचीनमते न वस्तुतो हलन्तेभ्यस्तदभाव इति ह्रस्वनद्याप इत्यत्र भाष्ये स्पष्टमिति शेखरोक्तिश्च चिन्त्येति विदां कुर्वन्तु सुधियः ॥ आचारक्विपि तु लक्ष्मी आदिशब्दे कृदिकारादिति अक्तिनत्वाभावात् ष्टुत्वं स्यादितिवाच्यम् । प्रियाष्टन्शब्दे परे तु स न इति शेखरपर्यालोचने तदभिधानस्यैव लाभात् विभावयन्तु समाधानं ज्ञातभाष्यगूढाभिसन्धयः ॥ अचः परस्मिन् पूर्वविधौ ॥ अच एवादेश इत्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

तेन मरुतमाचष्टे मारयतीत्यादौ न स्थानिवद्भावः । अत्र प्रयोगे योऽच्स्थानिको न तु सूत्रे उपात्ताच् स्थानिक इत्यर्थः । तेनाजादेरनेन स्थानिवत्त्वम् । अत एव चङ्परनिर्ह्रास इति स्थानिवत्वनिषेधो वादितवन्तं प्रैरीदवीवददिति सिद्ध्यर्थं सार्थकमित्युक्तमत्र शेखरे जुहुत इति प्रतीकमुपादाय श्लौस्स्थानिवत्वेन शप्त्वमादाय न गुणः अपरनिमित्तकत्वादजादेशत्वाभावाच्चेति तेनैवोक्तमिदपरस्परविरुद्धम् । णिलोपादिस्थलेऽनुत्पत्तेरेवान्वाख्याने वारिआख्यत् अवीवदित्यादौ टेरिति सूत्रेऽपि स्थानिवत्त्वप्रतिषेधकं चङ्परनिर्ह्रासेति वार्तिकं सार्थकमतोनवार्तिकेवैयर्थ्यमित्यपरमपि दूषणम् णिद्व्यलोपो यथा जात्याश्रयणात्तथा ह्रस्वेऽपि जातेराश्रयणादवीवददिति सिद्धे तथा च सूत्रे एवा चस्स्थानिक इत्यर्थेन सर्वेष्टसिद्धिरिति णिलोपादेरित्यत्रातद्गुणबहुव्रीहिणा टिलोप इत्यर्थाश्रयणेऽपि निर्वाहः । सूत्रेऽप्यचस्स्थानिकत्वादत्राकलयन्तु तत्त्वं नागेशभट्टानुयायिनः ॥

पिपठीरिति प्रतीकमुपादाय रत्वेऽल्लोपो न स्थानिवत् पूर्वत्रासिद्धे तन्निषेधात् इति शेखरोक्तं न पदान्तसूत्रे पदे अन्त इति सप्तमीसमासव्यावृत्तिपरभाष्यप्रामाण्यात्पूर्वत्रासिद्ध इत्येतत्तत्पदचरमानतिरिक्तत्रैपादिकग्रहणे रुत्वे स्थानिवत्त्वं भवत्येवेति शेखरेण सह विरुद्धम् । तत्र समाधानं वेञश्चान्यतरस्याम् वेञ इति सूत्रादग्रेऽन्यतरस्यां कितीत्येव सम्प्रसारणविकल्पेन सिद्धे ब्रश्चेतिसूत्रं व्यर्थं परत्वादतो लोपे सम्प्रसारणे जाते वार्णपरिभाषया पूर्वं बाधित्वाल्लोपस्यैव प्राप्त्या तस्यापि नित्यत्वात् । न चोवङि कर्तव्ये आभीयासिद्धत्वं तास्यानित्यत्वात्सम्प्रसाणाभावेन ववयिथेति सम्भाव्येनातो ल्यपि चेति चशब्देन लिटीत्यनुकर्षणाद् ववौ ववयिथेतिसिद्धमेवेति दिक् । अनिट्का-

SGDF
Sri Gargeshwari Digital Foundation

रिकाव्याख्यावसरे श्लिष्यतीति प्रतीकमुपादाय श्यना निर्देशः श्लिषआलिङ्गनइति सूत्रभाष्यप्रामाण्यात्तद्विशेषइति विभक्तौ विहितक्सस्य पुषाद्यङ्बाधकत्वमुक्तम् । अनिडित्यनुवर्तनाद्दाहार्थस्य सेटोग्रहणाभाव इति कैयटे इत्युक्तम् ॥ अत्रायं पूर्वपक्षः ॥ श्लिष इतियोगस्याङ्बाधकत्वम् यद्भाष्योक्तम् तदवष्टम्भेन कथं श्यन्विकरणस्यात्र पाठस्साध्यते एकाच् उपदेश इति सूत्रे ऽनुदात्तपरिगणनावसरे विश्लिष्ट इत्येव पठितव्य दाहस्यात्यनिष्टत्वे बाधाभावान्नहि दाहार्थस्यसेट्कत्वाङ्गीकारं विना तत्सूत्रभाष्योपपत्त्यभावः उभयोरनिट्कत्वे दाहार्थस्य पुषादित्वे तदंशेऽङः प्राप्त्यभावेन प्रतिप्रसवार्थे श्लिष इति योगे फलत्वे दाहार्थग्रहणे पुषादेरग्रहणेन बाधकत्वोक्तेः सार्थकत्वात् । य चोभयोरनिटकत्वे दाहार्थकर्मणि चिणः प्राप्तस्य बाधः श्लिष इत्यस्यसार्थक्येन पुषादिपाठबलप्राप्तस्यालिङ्गार्थश्लिष्यतेरन्यत्र पाठेनापि सिद्धौ पुषादिपाठेन श्लिषग्रहणं रूपसामर्थ्यप्राप्तस्याङः श्लिष इति विभक्तेन बाधानापत्तौ अङ्बाधकत्वासङ्गतिः दाहार्थस्य सेट्कत्व तु श्लिष इति विभक्त अनिट् इत्यनुवृत्त्या तदग्रहणे परिशेषात्पुषादिपाठप्राप्ताङ्बाधकत्वस्य बाच्यतया पर्यायेणाङ्क्सयोः श्रवणस्य वक्तव्यतया पाक्षिबाधमादायाङ्बाधकत्वोक्तिरिति वाच्यम् । दाहार्थस्य सेट्कत्वेनामिति इत्यनुवृत्त्या तद्ग्रहणाभावे ऽपि पुषादिविषये ऽपि चिणा बाधकेन चरितार्थस्य विभक्तस्य पुषाद्यङ्बाधकत्वानापत्त्या च पुरस्तादपवादन्यायेनाङि वाधकत्ववत् दाहार्थस्यानिट्कत्ववादिनो ऽपि चिण्बाधबोधनार्थत्वेन दाहार्थस्थले तद्बाधायोगेनात्र बाधकत्वस्य समापि सम्यक्त्वादिति चेन्मैवम् । विभक्ते दाहार्थके चिण्बाधनं फलमुत पुषाद्यङ्बाधकत्वमिति संशये पुषाद्यङ्बाधकत्वकल्पने

SGDF
Sri Garga... Digital Foundation

पूर्वोक्तरीत्या विकल्पापत्त्या चिणग्रहणस्य नित्यार्थतापत्त्या भाष्यासङ्गत्यापत्तेरिति दिक् । यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते आने मुग्विधानसामर्थ्यादेषा ऽनित्या अन्यथा पचमान इत्यादौ चकारस्य मुकि अनया परिभाषया विशिष्टस्य सवर्णदीर्घे तद्वैयर्थ्यं स्पष्टमेवेत्युक्तं परिभाषेन्दुशेखरे तन्न युक्तम् । अकारयोः कण्ठस्थानित्वं मकारस्योष्ठस्थानिकत्वेन तत्र जायमानो दीर्घः कण्ठोष्ठस्थानिक ओकार औकारो वा भविष्यति सूत्राभावेतु स न सिध्येदिति सूत्रवैयर्थ्याभावेन ज्ञापकता न सम्भवति किञ्च शानचस्सार्वधातुकमपिदिति ङित्वात्प्राप्तस्यातो ङितः इतीयादेशस्य सूत्राभावे वारणस्याशक्यत्वात्तत्सत्त्वे तु येन नेति न्यायेन तद्वारणादिति ज्ञापकता न सम्भवतीति न तु अकारस्य कण्ठस्थानिकत्वेन तत्र जायमानस्योक्तवत् परिभाषया कण्ठस्थानित्वस्याप्यतिदेशादागमे आगमिधर्मवैशिष्ट्यमपि बोध्यतइति सिद्धान्तात् । किञ्चाकारयोः कण्ठस्थानिकयोर्मात्राद्वयं तन्मध्ये प्रविष्टस्य मकारस्यार्द्धमात्रिकत्वेन मल्लग्रामादिवद्भूयसाव्यपदेशाज्जायमानो दीर्घ आकार एव भविष्यति इयादेशबाधकस्त्वातो ङित एवास्याग्रे आनस्य नेति न्यासेन सिद्धिरिति ज्ञापकता सम्भवत्येवेति नवीनग्रन्थश्रद्धालवो रटन्ति ॥ ङमो ह्रस्वादचि ङमुण्नित्यम् ॥ अत्र शेखरकृता पदान्तावयङमः परस्याजादेः पदस्य ङमुडिति भाष्योक्तसिद्धान्ते ऽर्थे परमदण्डिनावित्यादौ न दोषो मूलोक्तार्थाङ्गीकारे त्वन्तर्वर्तिविभक्त्या दण्डिन्नित्यस्य पदत्वान्ङमुट् स्यादुत्तरपदत्वे चेति प्रत्ययलक्षणनिषेधस्तु न माषकुम्भवापेनेत्यादौ पदव्यवायेऽपीति निषेधसिद्धये तस्य यत्रोत्तरपदस्य कार्यित्वं तत्रैव प्रवृत्तेस्तेन सिद्धमित्येतत्सूत्रस्थभाष्योक्तिस्त्वेकदेशिन इत्युक्तं तद्वि-

SGDF
Sri Gargeshwari Digital Foundation

रुद्धम् । पूर्वदण्डिप्रिय इत्यादौ नलोपार्थं वार्तिके मध्यमपदत्वानाक्रान्तोत्तरपदग्रहणावश्यवक्तव्यत्वाच्छेखरकृता समासाश्रये उक्तत्वाच्च माषकुम्भवापेनेत्यादावपि प्रत्ययलक्षणनिषेधाप्रवृत्तेः सूपपादत्वात्पदव्यवाये ऽपीति निषेधेन सिद्धमित्येतत्सूत्रस्थभाष्योक्तं च संगच्छते मध्यमेति विशेषणे उक्ते ऽपि पञ्चगवधन इत्यादौ प्रत्ययलक्षणे सत्यवङि यस्येति लोप रूपासिद्धिः सोऽपदादौ । अत्र सः प्रत्यय इति न्यास एव सुवचः । न चोरः कायतीति विग्रहे सुबुत्पत्तेः पूर्वं समासे उरस्केनेत्यादौ सत्वं न स्यादेवेति वाच्यम् । अन्यस्यासंभवे इति मनोरमाप्रतीकमुपादाय उपदेशे इत्येव कुप्वोरित्यनुवर्त्त्य यस्मिन् विधिरिति तदादिविधौ कवर्गादावपदे इत्यर्थेन सिद्धे आदिग्रहणमपदस्यैवादिरित्यर्थलाभापत्तेर्नोरस्केनेत्यादौ सुबुत्पत्तेः पूर्वं समासेन सत्वमादिग्रहणसामर्थ्यलब्धावधारणेन पदत्वयोग्यप्रातिपदिकावयवकुप्वोर्ग्रहणमिति शब्दरत्नकृतोक्तत्वाद्यथान्यासे ऽपि सत्वं नेष्यत इति न क्वापि दोषः । तथा युक्तं चानीप्सितम् । अनीप्सितपदाभावे ईप्सितप्रकर्षहीनस्याप्यनेन संज्ञाप्राप्तौ वारणार्थानामित्यस्यानवकाशत्वं स्यादिति प्रकृतसूत्रे शेखरकृतोक्तम् । तदयुक्तम् । पूर्वसूत्रे तमप्ग्रहणादीप्सितपदेन प्रवर्तते ईप्सिततमे तु पूर्वसूत्रारम्भसामर्थ्यादेव न प्रवर्तते अर्थादीप्सित एवैतस्य विषये इति वारणार्थानामित्यस्यानवकाशत्वादग्नेर्माणवकं वारयतीत्यादौ न काप्यनुपपत्तिरत एव मनोरमायाम् अनीप्सितग्रहणं स्पष्टार्थं न त्वावश्यकमित्युक्तम् ॥ अभिनिवेशश्च । अत्र सूत्रे शेखरे अभिनिवेश आग्रहः सन्मार्गविषयक आग्रहवानित्यर्थ इत्युक्तं तदयुक्तं वैयाकरणमते क्रियाविशेष्यकशाब्दबोधाभ्युपगमादिति तन्न । आग्रहशब्दो ऽर्श आद्यजन्तः । स कर्ता यस्य व्यापारस्य स

SGDF
Sri Gangeshwari Digital Foundation

आग्रहवान् व्यापार इति क्रियामुख्यविशेष्यकशाब्दबोध एवेति हेतुमति चेत्यादौ धर्मिवाचकान्मतुब्दर्शनादिति अस्मिन्नेव सूत्रे व्यवस्थितेति मूलप्रतीकमुपादाय परे तु इत्यादि आहुरित्यन्तमुक्तम् । तदयुक्तम् । एतद्दृष्ट्याषत्वासिद्धत्वादविकृतायाः श्रवणं ज्ञानमस्त्येवात एव श्रवणमित्युक्तम् । अथ वाविकृताया अविकरणस्थेत्यर्थ इति न काप्यनुपपत्तिरिति समाधानं कुर्वन्तु तदनुयायिन इति ॥ वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे । अत्र फलोपहितस्यैव निमित्तत्वेन विवक्षितत्वाद्वैयाकरणभार्ये न पुंवत्वनिषेध इति मूलप्रतीकमुपादाय वैयाकरणीभार्य इत्येव वृद्धिसंज्ञकौ एचौ भवत इत्यर्थात्फलोपहितग्रहणे फलम् ॥ अर्द्धप्रस्थकीभार्य्य इत्यत्र न ॥ अर्द्धात्परिमाणस्य पूर्वपदस्य तु वा ॥ अर्द्धात्परस्य परिमाणवाचकस्योत्तरपदस्य नित्यं वृद्धिः पूर्वपदस्य वा ञिति णिति किति च परे इति प्राप्ते नातः परस्येत्युत्तरपदवृद्धिनिषेधात् पूर्वस्य वैकल्पिकत्वेनाभावाच्चोपपादितं तन्न हीत्यादिना शेखरे उक्तम् तदयुक्तम् । अनेन निषेधाभावे ऽपि न कोपधाया इति निषेधसत्त्वात्तद्धितवुग्रहणमित्युक्तत्वे ऽपि तस्मादुपलक्षणमिदम् अर्द्धप्रस्थे भाव अर्द्धप्रस्थीभार्या यस्य तत्रापि अरक्तविकार इति पर्युदासेन तदन्ते ऽपि वृद्ध्यु त्पादनयोग्यत्वे सति यत्किञ्चिद्वृद्ध्युत्पादकत्वाभावे ऽत्र प्रयोगस्तथा च निमित्तग्रहणं मास्तु इति समाधानं सुधियो विभावयन्तु सर्वनाम्नः स्याड्ढ्रस्वश्च । आमि सर्वनाम्नः सुट् । अत्रायं पूर्वपक्षः ॥ अश्वक्षीरे सूत्रानन्तरं सर्वनाम्नोया सुट् तत आमि ततस्त्रेस्त्रय इत्येव कर्तव्यम् इदं च सूत्रद्वयं मास्तु उदीचामातः स्थाने यकपूर्वायाः । अत्रोदीचामातः स्थाने इत्येवास्तु तथा सति प्रतिपदोक्तपरिभाषया आ-

SGDF
Sri Gargeshwari Digital Foundation

पाऽन्यतरस्यामित्याब्ग्रहणे आर्यिका, आर्यकेत्यादिसिद्धिः। अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि। अत्र न तद्धितइत्येवास्तु लुग्ग्रहणं मास्तु प्रत्यासत्त्या तद्धिगोरेव तदन्तान्न ङीबित्यर्थे समाहारानिमित्तके द्विगौ पञ्चाश्वेत्यादौ निषेधो भविष्यतीति विभावयन्तु सुधियः॥ गोरतद्धितलुकि। अत्र गोरलुकीति न सूत्रितं सामर्थ्यात् सामासिके प्रवृत्तावपि वक्ष्यमाणे धातुप्रयुक्ते लुकि टजनापत्तेः। ङितिह्रस्वश्च। वामि अत्र सूत्रद्वय वाचि ह्रस्व इति न सूत्रितम्। सुदन्मतीत्यादौ नद्यृतश्चेति कबापत्तेः श्रीणामित्यादौ संनिपातेति नुडनापत्तेश्च॥ भवतेरः॥ अत्र प्राचोक्तं भवतेरिति कर्तृनिर्देशाद्भावकर्मणोर्नात्वम् व्याख्यातं च तत्पौत्रेण कर्त्रर्थयोस्तिपा निर्देशादिति तन्न धातुनिर्देशमात्रे तयोर्विधानात् शपश्च विकरणत्वेनानर्थकत्वात् कर्त्रर्थे परे विहितस्य श्तिपः श्तित्वसामर्थ्यादेवेह प्रवृत्तेरिति मनोरमाग्रन्थः। अत्राशङ्कते श्तिपः श्तित्वस्यार्द्धधातुकव्यावृत्त्या चरितार्थत्वात् तेनार्द्धधातुकस्येडिति इडागमाभावः नच तत्र तितुत्रेतीण्निषेधः एवमपि ब्रवीतीत्यादौ हलादेः पितः सार्वधातुकस्य विधीयमानो ब्रुव इडित्यनेनेडागमो न स्यात् श्तित्वाभावेआर्द्धधातुकत्वात् उत्तरपदत्वे चेति वार्तिके पूर्वदण्डिप्रिय इत्यादौ त्रिपदे बहुव्रीहौ कृते प्रियशब्दे उत्तरपदे परे तद्धितार्थोत्तरेति द्वयोस्तत्पुरुषे नलोपार्थमवश्यं मध्यमपदत्वानाक्रान्तेति वक्तव्यं मध्यमपदत्वानाक्रान्तविशेषणेनैव माषकुम्भवापेनेत्यादावपि कुम्भेत्यस्य मध्यमपदत्वात्प्रत्ययलक्षणसिद्धौ पदव्यवायेनेति णत्वनिषेधे सिद्धे कार्यित्वनिवेशो न कार्य इति चेन्नैवम्। गोचेत्यादावल्लोपस्य स्थानित्वमादाय अवङ्प्राप्तौ न पदान्तेति सूत्रे भाष्ये वेतस्वानित्यादौ स्थानिवत्वनिषेधाभावमूलकरुत्वाभावाय पदे ऽन्त इति सप्तमी समासे प्रत्यासत्त्या परपदस्था-

SGDF
Sri Gargeshwari Digital Foundation

जादेशो न स्थानिवदित्यर्थान्न जोयते गोचेत्यत्र पदत्वं सुबन्ते- न समासे प्रत्ययलक्षणेनैव पदत्वात् तच्च दुर्लभमुत्तरपदत्वे च तिनिषेधात् कार्यित्वनिवेशे तु प्रकृते कार्यित्वाभावादुत्तरपदेति वार्तिकाप्रवृत्तौ प्रत्ययलक्षणेनैव पदत्वात् परपदस्थाजादेशत्वात् स्थानिवत्वानिषेधान्नावङ् अत्रोच्यते गतिकारकोपपदेति परिभा- षया सुबुत्पत्तेः प्राक् समासे परपदस्थेत्यत्र पदशब्दः पदत्व- योग्यपर इति भवदुक्तेः प्रकृते दोषाभावात् अतद्धितइति वक्त- व्यं पदव्यवाये ऽपीति सूत्रस्थवार्तिकम् आर्द्रगोमयनेत्याद्युदाह- रणमेतद्वार्तिकप्रत्याख्यानाय भाष्ये पदव्यवायइति सप्तमीसमासे निमित्तिनोर्मध्ये यत्पदं व्यवधायकं तस्य परपदत्वम् । यत्रा- स्ति तत्र णत्वनिषेध इत्यर्थे आर्द्रगोमयेणेत्यादौ व्यवधायकस्य गोः परपदत्वाभावाण्णत्वनिषेधोन एवं च माषकुम्भवापेने- त्यादावपि वापेत्यस्य पदत्वं वक्तव्यं प्रत्ययलक्षणेनैव तच्च दुर्ल- भं कार्यित्वनिवेशाभावे मध्यमपदानाक्रान्तोत्तरपदत्वाभावादुत्त- रपदत्वे चेति प्रत्ययलक्षणनिषेधात् तन्निवेशे तु कार्यित्वाभावा- त्प्रत्ययलक्षणवृत्त्योत्तरपदपत्वात्षत्वनिषेधः तथा च कार्यित्व- निवेशः सफल इति चेन्नैवम् । सिद्धान्ते ऽपि माषकुम्भं वपती- ति उपपदसमासे सुबुत्पत्तेः प्राक् स्वीकृते च तत्र णत्वनिषेधाय पदे व्यवाय इत्यत्र पदशब्दः पदत्वयोग्यपर इत्यर्थो भट्टैरवश्य- मङ्गीकर्तव्यः । नच गतिकारकोपपदेत्यस्यानित्यत्वात्सुबु- त्पत्त्यनन्तरं समासे कार्यित्वनिवेशे प्रत्ययलक्षणेन पदत्वपर- त्वात् प्रकृते निषेधे पदशब्दस्य पदत्वयोग्यपरत्वे मानाभाव इति वाच्यम् । धगक्रीतेति प्रतीकमुपादाय कर्तृकरणइत्यत्र बहुलग्रह- णेन गतिकारकोपपदानामित्यस्यानित्यत्वात्सुबुत्पत्त्यनन्तरमेव समास इति भावः । इदमुपपदमिति शूत्रे कैयटे स्पष्टम् अयम- ज्ञादिष्वित्यनेन गत्यादेरनित्यत्वे न मानमिति तदाशयः । अत

SGDF
Sri Gangeshwari Digital Foundation

एव एतत्कर्तृकरणइति सूत्रे बहुलग्रहणफलत्वेनोक्तं भाष्ये अम्बाम्बेति सूत्रे गवादिग्रहणं तु निपातार्थं तेन हृदिस्थ इत्यादौ षत्वं नेति दिगित्युक्तम्। शेखरइति स्वीयग्रन्थपर्यालोचनया गति कारकेत्यस्यानित्यत्वाभावे माषकुम्भवापेनेत्यादौ उपपदसमासे णत्वनिषेधार्थं पदव्यवाये इत्यत्र पदशब्द पदत्वयोग्यपर इति भट्टैरप्यवश्यमङ्गीकरणीयव्याख्यानेन माषकुम्भवापेनेत्यादौ पूर्वं समासे णत्वनिषेधसिद्धौ सप्तमीसमासेपदव्यवायेनेति सूत्र वैयर्थ्येन च कार्यित्वनिवेशाभावेऽपि प्रत्ययलक्षणस्वीकारे कार्यित्वनिवेशो निष्फल एव। किञ्च पर्य्याणद्धमित्यत्र गतिकारकेत्यस्यानित्यत्वपक्षे ऽपि सुबुत्पत्त्यनन्तरं कुगतीतिसमासे कार्यित्वनिवेशे सत्यपि प्रकृते नद्धमित्यस्य णत्वनिषेधरूपकार्यित्वात्प्रत्ययलक्षणनिषेधे पदपरत्वाभावान्निषेधाभावे णत्वापत्तेः अट्कुप्वाङिति सूत्रे आङ्ग्रहणवैयर्थ्यापत्तेश्चातः कार्यित्वनिवेशे ऽपि पदव्यवायइत्यत्र पदशब्दः पदत्वयोग्यपरः विभक्तीतरानपेक्षया लोके ऽर्थबोधजनकपरो वा सर्वैरत्या स्वीकर्तव्य एव इति कार्यित्वनिवेशाभावे ऽपि माषकुम्भवापेनेत्यादौ सप्तमीसमासे ऽपि न दोषः किञ्च अजादेः पदस्येत्येतन्मात्रार्थं ङमुट्सूत्रे ऽनुवृत्त्यर्थम्। उञि च पदे इति सूत्रस्थपदग्रहणं कार्यं परमदण्डिनावित्यादौ मूलोक्तार्थेनापि प्रत्ययलक्षणनिषेधे ङमन्तपदाभावान्न ङमुडित्यपरमपि लाघवमिति विभावयन्तु सुधियः। अतोम्। इत्यत्रम् इति च्छेदे प्रथमैकवचने उकारस्येत्संज्ञालोपयोः सकारस्य मकारे कृते ज्ञानमिति सिद्धम्। द्वितीयैकवचने- आदेः परस्येत्यकारस्य मकारे कृते मकारद्वयश्रवणंस्यादिति। न च संयोगान्तलोपेन निर्वाहः झलो झलीत्यतो झल्ग्रहणानुवृत्त्या संयोगान्तस्य झलो लोपान्मकारस्याझल्त्वात् झल्ग्रहणाननुवृत्तिपक्षे वाक्यभेदे संयोगान्तस्य लोपः संयोगान्तस्य झलो

SGDF
Sri Gargeshwari Digital Foundation

ऌोप इति पूर्ववाक्यं क्व चिद्यणतिरिक्तेऽझल्यपि प्रवर्तते यथा गिरिवेडिति अत्र गिरौ वेश्मयस्य स गिरिवेश्मयतीति गिरिवेडिति अज्झलो लोपे प्रमाणम् । अमो मश् । इत्यत्र मद्वयं विधाय मकारस्य संयोगान्तलोपे वर्धी वृत्रमिति रूपसिद्धौ शित्वप्रत्याख्यान परं भाष्यमेव वर्धी वृत्रमित्यत्र संयोगान्तलोपस्यासिद्धत्वादस्ति सिच इत्यपृक्ताश्रयस्येह लोपानापत्त्या एकदेश्युक्तं तद्भाष्यम् अदड्डतरादिभ्य इति सूत्रे भाष्ये ऽदड्डों डित्वाभावे प्रथमयोरिति पूर्वसवर्णदीर्घमाशङ्क्यानुनासिकोपधत्वादित्युक्त्या दीर्घवारणे द्वितीयैकवचने आदेः परस्येत्यकारस्य दकारे मकारश्रवणेनापादानपरं भाष्यं प्रकृते गमकं हे ज्ञान इत्यादौ म निमित्तप्रकृतिप्रत्ययसन्निपातविनाशे एङ्ह्रस्वादिति लोपः सन्निपातपरिभाषया न स्यादिति मिति च्छेदे समाधानमुक्तं शेखरकृता तदपि विरुद्धम् । एङ्ह्रस्वादिति सूत्रस्य शेखरेण तत्वे हि हेलक्ष्मि इत्यादौ सन्निपातपरिभाषया संबुद्धिलोपो न स्यादित्याशङ्क्य गुणात्संबुद्धेरिति वक्तव्ये एङ्ह्रस्वग्रहणाज्ज्ञापकात्संबुद्धिलोपे कर्तव्ये सा परिभाषा न प्रवर्तते । न च विशेषापेक्षं ज्ञापकं संबुद्धिमुपजीव्य यत्र ह्रस्वस्तद्विषये न प्रवर्तते इति असतिबाधके प्रमाणानां सामान्ये पक्षपातादिति न्यायात्सामान्यापेक्षं संबुद्धिमात्रलोपे न प्रवर्ततइति । न च एङ्ह्रस्वादिति सूत्रस्थं हे ज्ञान इत्यादौ लोपोपपत्तये हल्पदानुवृत्तिव्यधिकरणान्वयाङ्गीकारपरं भाष्यं बाधकमस्तीति मैवम् । लाघवात्सामान्यपेक्षमेव ज्ञापकम् । सिद्धान्तिनोक्तम् व्यधिकरणान्वयहल्पदानुवृत्तिपरं भाष्यमेकदेशयुक्तिगौरवात् तस्मात् मकारच्छेदे ऽङ्गाक्षेपो व्यधिकरणान्वयहल्पदानुवृत्तये न कर्तव्यो न क्वापि दोषलेशश्च समाधानमूह्यम् ॥

इति श्रीमद्धोरिलसंदर्भितपुण्यग्रामसभासद्प्रौढपण्डिताविप्रतिपत्तिजन्यपूर्वपक्षसङ्ग्रहः ॥ इति श्रीपूर्वपक्षावली समाप्ता ॥

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

सूचीपत्रम् ।

		आ.पा.
१	मीमांसान्यायप्रकाशः (आपोदेवकृतः) ...	०-१०-०
२	चरणव्यूहः- सभाष्यः शौनकीय परिशिष्टः स०	०-६-०
३	शब्दकौस्तुभः—नवाह्निकमात्रम्	४-०-०
४	व्याकरणमहाभाष्यम् कैयट टीकोपेतम् ...	१०-०-०
५	तस्यैव—नवान्हिक कैयट विवरण सहित ...	१-८-०
६	काशिकावृत्ति—ससूत्रा	५-०-०
७	पातञ्जलयोगदर्शन–स्वामी बालरामजीकृत टिप्पणी स०	३-०-०
८	वैयाकरणभूषणसार—दर्पणटीकोपेता ...	२-०-०
९	माथुरीपञ्चलक्षणी	०-२-०
१०	मीमांसादर्शनम्—शावरभाष्य सहितम् ...	८-०-०
११	सांख्यदर्शनम् सांख्यप्रवचनभा[...]सहितम् ...	१-८-०
१२	दानमयूख (धर्मशास्त्र)	१-८-०
१३	कालमाधव (धर्मशा[...])	१-०-०
१४	जागदीशी—स[...]मेतिप्रकरणस्य	०-१२-०
१५	सिंहव्याघ्रल[...]तपञ्चलक्षण्याः	०-४-०
१६	व्यधिकर[...]	०-१२-०
१७	[...]	०-८-०
	[...]कसामान्याभावविशेषव्याप्तिग्रन्थस्य	०-८-०
	[...]	०-१२-०
	[...]	०-१२-०
	[...]	०-८-०
	[...]ो । तर्कप्रकाशटीकासहिता ।	१-०-०
	[...]का । श्रीकृष्णकान्तीयटीकासहिता	३-४-०
	[...]म०प०सुधाकरद्विवेदि-कृतटिप्पणीस०	१-४-०
	[...] म०पं० बापूदेवशास्त्रीकृतम् पूर्वार्धम्	२-०-०
	[...] पं० बापूदेवशास्त्रीकृत उत्तरार्ध	१-०-०
	[...]० म० पं० बापूदेव शास्त्री	६-०-०
	[...]	२-०-०

[...]क

[...]मस

[...]रिदासगुप्तः—कार्याध्यक्षः

[...]ते श्री[...]जकार्यालय-बनारससिटि ।

SGDF
Sri Gurgeshwari Digital Foundation